काव्यादर्शटीका द्वितीयतृतीय परिच्छेदयोः

२ पत्र

४०-४०८=१०
पत्राणि

दं०टी० ॥ श्रीगणेशाय नमः ॥ तदेवं श्लेषप्रसादादिशब्दालंकारस्वरूपं मार्गविभावनानिरूपणमभिधाय सा
धारणमुभयमार्गव्यापकं स्वभावत्वाख्यानादिभाविकपर्यंतमधुना द्वितीयपरिच्छेदेनोच्यते । तत्रा
॥१॥ लंकारेषु प्रचक्षत इत्यनेनास्य प्रकरणस्य शब्दविभागरूपस्यालंकारादिविषयत्वप्रतिपादनादभिधेय
त्वाभावमपाकरोति ॥ तथा काव्यशोभाकरान्धर्मानित्यनेनाभिधेयप्रयोजनप्रतिपादनात् काकदंतप
रीक्षावल्लिः प्रयोजनस्यादनारंभणीयतादोषं निराकरोति ॥ अतः शब्दार्थौ सहितौ काव्यं तत्र शब्दः का
व्यशरीरं तत्त्रिविधं चतुर्विधं द्विविधं च व्याख्यातं प्रागुक्तं । तैः शरीरं च काव्यानामलंकाराः प्रदर्शिताः । इ
शब्दशरीराभिधानादेवार्थोप्यभिधेयः प्रदर्शित एव । इदानीं काव्यशरीराभिधानानंतरमलंकारानाा
ह ॥ ॥ काव्यशोभाकरान्धर्म्मानित्यादिनालंकारसामान्यलक्षणमुक्तं । अलंकारानीतिलक्ष्यनिर्दे
शः । प्रचक्षते भेधा विभज्यन्ते ह्यादपूः । ते चालंकारा अद्यापि निरूप्यंते । यद्यपि काव्यशोभाकरधर्म्मा अलं
कार इत्युक्तं । तथापि नैतावतालंकारसाधारणलक्षणमात्रकथनादेव ज्ञातुं पार्य्यते किं लघापि नि एम० ॥१॥

रूप्यंते॥ विशेषलक्षणोदाहरणे प्रदर्शनेन कृतिचित्। यतः कस्तान्कार्त्स्न्येन वक्ष्यते। तेषां प्राक्कवि
स्थितानामानंत्यादिति। यद्येवं तेषां मतिबाहुल्यात् लक्षणप्रतिपादनावस्थानुष्ठानमित्याह॥ ॥किं
तु बीजं: बीजमिव बीजं लेशः विकल्पानामुपमालंकारभेदानां दर्शितं पूर्वाचार्य्यैः। तदेव बीजं। प्रतिकर्तुं
विवरीतुं। अयममस्मत्परिश्रमइत्यनेनात्मस्वातंत्र्यप्रतिषेधादनुपासितगुरुत्वालक्षणं दोषं परिहर
ति॥ ॥श्लेषप्रसादादयो वैदर्भगौडीयमार्गविभागार्थमुक्ताः। प्रागाथाद्यपरिच्छेदे। अलंक्रिया अलंका
राः। इदं पुनरन्यदेव श्लेषादिभ्यः उभयमार्गसाधारणमलंकारजातं जात्यादि प्रदर्श्यते। तत्र किंनामीमा
नीमलंकाराः किंयंतः किं तेषां लक्षणमित्याह॥ ॥स्वभावाख्यानाद्यो भाविकपर्यंता इति शब्दाना
मलंकारा भूषणानि॥ ॥रूपं विभिन्नलक्षणां स्वरूपं स्वभावमसाधारणलक्षणा धर्मं पदार्थानां जा
तिगुणक्रियाद्रव्यरूपाणां साक्षाद्दृश्यवकेन शब्देन वक्रोक्तिरूपेण विवृण्वती स्वभावोक्तिश्च जातिश्चेति
संज्ञाद्वयं कृत्वा साद्यालंकृतिः प्रथमोलंकारः। यथेमुदाहरणं॥ ॥तुंडैराताम्रकुटिलैरतेमंजरीरःशु

द०टि०

।।३।।

काइतिजातेरुदाहरणं। कलक्वणितगर्भेणकंठेनपारावतस्तुवतिप्रियामितिप्रियामाः। वधूनांगेषु
रोमांचंप्रियास्पर्शःप्रवर्त्ततइतिभगुहास्य। कंठकालोवृषध्वजइतिद्रव्यस्यस्वरूपंव्याचष्टे।। ।।जातिगुण
क्रियाद्रव्यस्वभावाख्यानमीदृशं। एवंविधमन्यदपीतिइदृशशब्देनसर्वनाम्नादर्शपतिशास्त्रेष्वस्येवस्व
भावाख्यानस्येवालंकारस्यसाम्राज्यंप्रभावं। तथाकाव्येष्वप्येतदीप्सितं। तथावपदकंकेश्मितं। मतो
त्तमर्कोभातीदुर्मीतिवासायपक्षिणः। इत्येवमादिकंकाव्यंवार्त्तामेतांप्रचक्ष्यतेइति। तन्निरस्तोउपमा
लंकारमाह।। ।।यथाकथंचिद्येनकेनविलक्षकारेणसादृश्यंसमानोधर्मोयत्रउद्भूतंप्रकटंप्रतीयते:
उपमानामसा।। तस्याउपमायाःप्रपंचोयमुपमालंकृतेःप्रदर्श्यते। अंभोरुहमिवाताम्रंमुग्धेकर
तलंतवोपेषाधर्मोपमा।।आताम्रामितिधर्म्मः। तस्यसाक्षादाताम्रशब्देनतुल्यस्यधर्मस्यांभोरुहकर
तलोभयधर्म्मिसाधारणस्यनिदर्शनात्। राजीवमिवतेवक्त्रंनेत्रेनीलोत्पलेइवाइत्येषाप्रतीयमानो
गम्यमानःशब्देनानुपात्तएकोधर्म्मोराजीवमुखयोःकांतेनेत्रेनीलोत्पलयोःसुरेद्र्यंयस्यांसाप्रती

दाम०

।।३।।

पमानैकधर्मवित्स्तूपमेवावस्तुशब्दोत्पन्नहंव्यादिषु कर्मानोपीह द्रव्यमेव द्रष्टव्या॥ राजीवनीलोत्पला
भ्यां द्वाभ्यामुपमीयेते मुखनेत्रे यतस्ततो धर्म्मुपमेत्युच्यते। त्वदाननमिवोन्निद्रमरविंदमभूदिति। सा
प्रसिद्धविपर्यासात्॥ साप्रसिद्धारविंदमुखयोरुपमानोपमेयभावस्य विपर्यासात्। मुखारविंदस्योरुप
मानोपमेयभावस्य प्रदर्शनाद्विपर्यासोपमानाम॥ त्वदाननमिवांभोजमंभोजमिव ते मुखं॥ इत्यन्यो
न्योपमास्येयमिति तत्र मुखेनांभोजमुपमीयते। अंभोजेन च मुखमित्यन्योन्योत्कर्षशंसतीति हेतुः॥ अन्यो
न्यातिशयप्रशस्तिनीलादन्योन्योपमानामा त्वन्मुखं कमलेनेव तुल्यं नान्येन चंद्रादिनाकेनापि सदृश
मित्यन्यस्याप्यव्याहृतेः परसाधर्म्यनिषेधात्। इयमित्थं·भूतासानियमोपमोच्यते। पद्मं तावत्तवान्वेति
मुखंपद्मं सदृशं तवैतात् तत्·त्वन्मुखमन्यदपि वस्तु यदि पद्मसमं कांतं किमप्यस्ति वस्तु त्वन्मुखसमं इति
नियमानिराकरणात्॥ अस्यैव नियमोपमा॥ समुच्चयोपमाप्यस्ति। नकांत्यैवैकया ह्लादनाख्येन चानं
दजनकत्वेन कर्मणा मत्वन्मुखमिंदुमतीतीति दृश्यते॥ त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि·दृश्यते दिवि चंद्रमाः न त्व

पि॥ इदं पद्मेव भिद्यमानेव भेदहीनकांतिलतः॥ इत्यतिशयोपमा॥ मय्येवास्याः कांतायामुखश्रीराननशो
दं॰टी॰ भांइति विकत्थनैरलं। अलं प्रतिषेधे॥ पद्मेपि सा पदस्येव न केवलमस्या मुखश्री चंद्रे एवार्थात् पद्मेप्यस्तीस
॥३॥ स्य उत्प्रेक्षितोपमा। चंद्रः किलैवमन्यते इति काकुनोत्प्रेक्ष्यते। इत्युत्प्रेक्षा चंद्रे पद्मगताकांतिसादृश्यमस्य मु
खस्येत्युपमा। अद्भुतोपमामाह। यदि किंचिद्भवेत्पद्मं सुभ्रु उन्नतभ्रूकः तथा विभ्रांतलोचनेः यत्र तद्विभ्रां
तलोचनं तत्तेव मुखं श्रियं धत्तामित्यद्भुतामित्यद्भुतोपमा। अद्भुतत्वं च तथाभूतपद्मस्याभावात्॥ मोहोपमा
इति॥ शशीत्युत्प्रेक्ष्य तलं गिलन्मुखं लन्मुखाशया। इंदुमप्यनुधावामीति॥ त्वन्मुखं तदेव शशीति मलाल
न्मुखाशामालदानन तल्लमा इंदुमप्यनुधावामीत्येषा मोहोपमा॥ मोहो भ्रमं मुखचंद्रमो विवेकानवगतेः। किं
पद्मम् अंतर्भ्रांतालिः अंतर्भ्रांता लोला भ्रमरा यस्य तत् इदं तर्भ्रांतालि। किं लोलेक्षणं मुखं लोले तरले ईक्षणे चक्षु
षी यस्य तल्लोले ईक्षणे यस्य तल्लोलेक्षणं किं वा मदीयं मुखमिति मम दोलायते चित्तं। अंतर्भ्रांतालिनः
पद्मस्य लोलेक्षणास्य मुखस्य च समानधर्मोपपत्तेः संशय इति संशयोपमा। निर्णयोपमामाह। न पद्मस्ये राम॰
॥३॥

·८०५ का०भा०:

नान्यत्र तद्दीक्षणानामेव नयनोपमाभूतत्वात्। तथापि सम एवासौ सकलमृगनारीसंकितोपिल
न्मुखेन सम एव नोक्तषधायक इति बहूपमा। कश्चित्कामुकः कांतां चाटूनि कुर्वन्निदमभ्यधात्। तत्वाख्यानो
पमामाह। न पद्ममित्यादि॥ सुगमः। असाधारणोपमामाह॥ चंद्रारविंदयोः कक्षासमानतां समानतामति
क्रम्य तव मुखमात्मनैव तुल्यमभवत्॥ परस्य वस्तुनः स्वस्य मानस्योपमानभूतताभावात्॥ असाधारणोप
मा। गगनं गगनाकारं सागरः सागरोपमा। इत्यादिनासाधारणोपमा पाउदाहरणोदृष्टव्यं। अभूतोपमाह
।सर्वपद्मप्रभासारः समाहृत इव क्वचित्। त्वदाननं विभातीति तामभूतोपमां विदुः सकलपद्मभासारस्यैक
त्र समाहरणाभावात्। अभूतेनार्थेनोपमीयमानत्वात्॥ इत्यभूतोपमा। चंद्रबिंबादिव विषं चंदनादिव
पावकः। परुषा वागितो वक्त्रादित्यसंभावितोपमा निखलु कदाचित्सुधांशुमंडलाद्विषसंभवो न चं
दनमित्यसौ विक्रियोपमा। उत्किरणायोद्धरणायोश्चंद्रपद्मौ तयोरग्निसंभवोस्तीति असंभावितोपमा
।शेषमृजु॥ इंदुबिंबाद्दिवोत्कीर्णं पद्मगर्भादिवोद्धृतं। तव तन्वंगि वदनमित्यसौ विक्रियोपमा। उक्तिरण

र०टी०

पोद्धरणयोश्चंद्रपद्मविषयत्वाद्द्विकोपमेत्युच्यते।चंदनीरदकचंद्रांशुचंद्रकांताद्रिशीतलः।स्पर्शस्तवेस
तिशयंप्रथयतीबहूपमा।चंदनीरदकादिभिर्बहुभिःशीतस्पर्शसाम्योपमीयमानत्वाद्बहूपमेत्युच्यते।मालोप
॥५॥ मामाह।पूर्णिमेआदित्येआतपइवस्वच्छा।ओमिमिआकाशेवासरोदिवसइवविक्रमस्त्वयिलक्ष्मीशोभामधादि
तिमालोपमाअमः।एवंविधोन्योपिमालोपमालंकारोभवतीत्यर्थः।वाक्यार्थोपमामाह।।वाक्यार्थेनैववाक्या
5 र्थः कोपियद्युपमीयते।एकानेकेवशब्दत्वात्सावाक्यार्थोपमाद्विधा।साम्यातंसांसामान्यंवैवस्तुविशेषंसका
रकं।अनेकपदसंदोहः।उपमाकल्पितरसाभिधेयामितिहवाक्यंपरिगृह्यतेतस्यार्थोवाक्यार्थस्तेनवाक्या
र्थेनैववाक्यार्थःकोपियद्युपमीयते।एतदुक्तंभवति।वाक्यार्थएवयद्युपमानंभवतितथावाक्यार्थएवो
पमेयस्तथासावाक्यार्थोपमा।लक्षणमाभिधायोदाहरणात्यांस्पष्टयितुमेकेवशब्दामुदाहरति।त्वदा
ननमधीराक्षमाविर्दशनदीधितिः।इतिवाक्यंतस्यार्थः।त्वदाननंत्वन्मुखंकथंभूतंअधीरेचपलेअक्षिणी
यत्रतदधीराक्षं।तथाविर्भवंतीदशनदीधितिर्यत्र।अयमेववाक्यार्थः।भ्रमद्भृंगमिवालक्ष्यकेसरंभा राम०
॥५॥

तिपंकजं।। भ्रमद्भृंगमिवेत्येक एवकार उपमाद्योतकः। इत्येकेवकारोपमा व्याख्याता। अनेकेवकारामुदाहरति
।नलिन्या इव तन्वंग्यास्तस्याः पद्ममिवाननं।मिति वाक्यार्थः मया मधुव्रतेनेव पायमपायमरम्यत।स्पं इत्यने
न वाक्यार्थेनोपमामालक्ष्यते। नलिनीव या तन्वंगी तस्याः पद्ममिव यत्कांतिमद्विकाशि सुगंधि चाननं तन्म
या मधुव्रतेनेव पायंपायं पीत्वापीत्वा अरम्यत यथा नलिन्याः पद्मं पीत्वापीत्वा रमते मधुव्रतः।। एवं मयापि कां
तया मुखं पीत्वापीत्वा अरम्यत इति। नलिन्या इत्येक इवकारः। पद्ममिवेति द्वितीयः। मधुव्रतेनेवेति तृतीय इत्य
नेकेवकारा वाक्यार्थोपमा प्रतिवस्तूपमालक्षणमाह। वस्तु किंचिदुपन्यस्यापूर्वं न तत्सधर्मिणस्तेन पू
र्वोपन्यस्तेन वस्तुना समानो धर्मो यस्य तत् तत्सधर्मि तस्य वस्तुन उपन्यसनं सा प्रतिवस्तूपमा नामालंकृतिः
कुतः साम्यप्रतीतिः पूर्वापरोपन्यस्तयोः साम्यप्रतीतिरस्तीति हेतोरिति शब्दो हेत्वर्थे वर्त्तते। यथा हंतीति
पलायते वर्षतीति धावति। यथेमुदाहरणं। नैकोपि त्वादृशोद्यापि जायमानेषु राजसु।आस्तां तावल्लक्ष्मः।ए
कोपि त्वादृशस्त्वत्समो राजा जायमानेषु राजसु नेति प्रतिषेधे।अस्तीति वाक्यशेषः।इति पूर्वमुपन्यवस्तुर

र०टी० ततस्तस्य धर्मिणोवस्तुनउपन्यासः।ननुद्वितीयोनास्तिवपारिजातस्यपादपः।पश्यपारिजातस्यपादपोन
॥६॥ द्वितीयोस्तितथातस्समोन्योराजानास्तीतिपारिजातपादपेनोपमीयमानत्वात्प्रतिवस्तूपमालंकारः।तुल्ययो
गोपमालक्षणमाह।अधिकेनसमाहृत्यअधिकेनवस्तुनासमाहृत्योहिस्यहीनमेकक्रियाविधौएककार्य
6 कारणंप्रतिमद्ब्रुवंत्याचार्याः।स्मृतासेयंतुल्ययोगोपमा।यथेत्युदाहरति।दिवःस्वर्गस्यरक्षायेरक्षणार्थंपुलो
मारिरिंद्रोजागर्तिभुवांअपिभुवःपृथिव्यारक्षायैजागर्तीति।असुरादानवास्तेनपुलोमारिणाहन्यंतेबल
पापिसुवलेपाःसदैत्यपावैरिणाहन्यंते।अधिकेनपुलोमारिणासमाहृत्यन्नृपतेःसाम्यमापाधरिवौरक्षणाभ्यु
र१क्षणजागरणाप्रतिअसुरहरणचएकक्रियाविधिंप्रतिनृपतेःपुलोमारिणाइंद्रेणासमतापादनात्।तु
ल्ययोगोपमा॥कांत्याचंद्रमसंधाम्नासूर्यंधैर्येणचार्णवम्।राजंननुकरोषीतिसैषाहेतूपमामता।
कांतिधामधैर्याणिचंद्रसूर्यसमुद्राणामनुकरणेराज्ञोहेतूपमाः।लिंगंस्त्रीनपुंसकंववचनमेकद्विवहुवचनं रा०म०
चालिंगवचनेभिन्नेविसदृशेउपमादूषणायोपनालंनसमर्थेउपमांदूषयितुं।तन्न्यूनाधिकतापिवा।उपमा ॥६॥

नोपमेयोपमेयोर्लिंगवचनभेदोन्यूनाधिकताचनदोषायेत्यर्थः किंसर्वत्रलिंगवचनभेदोन्यूनाधिकताचनो
पमादूषणमलमित्याह। यत्रोद्वेगोनधीमतां॥ यत्रलिंगवचनभेदेन्यूनाधिकतायांचोपमानोपमे
यमोःधीमन्तोनोद्विजंते तत्रनदोषइति। अथयत्रधीमंतउद्विजंते तत्रलिंगवचनभेदोन्यूनाधिकतायां
चोपमादूषणमलमेवात्रधीमद्भिरभिमतं लिंगवचनभेदमुदाहरति॥ स्त्रीवगच्छतिषण्ढोयंवक्त्येषाप
मानिवेतिलिंगभेदः। प्राणाइवप्रियोयंमेइतिवचनभेदः। विद्याधनमिवार्जिता। विद्या आन्वीक्षिक्याद
यः। इत्युपमभेदः। अभिमतंन्यूनाधिकतामुदाहरति॥ भवानिवमहीपालदेवराजोविराजते। अलमंशुम
मतः कक्षामारोढुंतेजसीनृपः। स्त्रीवगच्छतिषण्ढोयमित्येतदारभ्यतेजसीनृपइत्यंतं सौभाग्यंसौंदर्यंन
जहातिनत्यजति। जातुकदाचित्। अस्तिचक्रविद्ददृगः पृथ्वीगोवा। विंदोविदुषां। यथेमुदाहरति। हंसीव
धवलश्चंद्रइतिलिंगभेदः। सरांसीवामलंनभइतिवचनभेदः। भक्तिभक्तोमध्यमेवेतिन्यूनता। खद्योतोभा
तिभानुवदित्यधिकता। ईदृशंहंसीवधवलश्चंद्रइत्यादिवर्ज्यमेव। सद्भिःकारणंतत्रचिंत्यतामालोच्यतां।

दि०टि० चिंसलक्षणमाह यतां। शब्दशक्तेरनंतत्वात्प्रत्येकं परिवर्जनिकारशक्यकथपितुमशक्यत्वात्स्वयं सं
द्धिरूह्यतां। अर्थकैः पुनरन्यैः रूपमोह्यतामित्याह। इववद्यथाशब्दाइत्यादि। शब्दाः सादृश्यसूचकाः॥
॥७॥ ॥इत्युपमाचक्रम्॥ ॥रूपकलक्षणमाह॥ ॥उपमैव तिरोभूतभेदा रूपकमुच्यते। तिरोभूतभेद इत्युपमा
७ नोपमेययोर्यस्यां सेति तिरोभूतभेदा। यथा बाहुलतावाहुलतेवेत्युपमा। उपमितं व्याघ्रादिभिः सामान्या
प्रयोगइति समासः। इयमेव तिरोभूतभेदा सती रूपकं भवति। बाहुरेवलता बाहुलतेति रूपकं। एवं सर्व
त्र योज्यं। अंगुल्यः पल्लवान्यासः इत्यादिवाक्यरूपकं सामान्यस्याभावात्। पूर्वं बाहुलतेत्यादि समस्तरूपकं
। शेषमस्तु। स्मितं ज्योत्स्ना ते तिमिरं मुखं चंद्रो इति समस्तरूपकं। ताम्रांगुलिदलश्रेणिनखदीधितिकेसरं
। ताम्रांगुलय एव दलश्रेणिर्यत्र नखदीधितय एव केसराणि यत्र तत्तथा। ध्रियते मूर्ध्नि भूपालैर्भवच्चरणप
कजं। चरणा एव पंकजं इत्यसमगुल्म। द्विहलादित्समारोप्यरूपापितापादेवारोप्य पद्मतां पादे च पद्मरूपापि
तानयोग्यस्थानविन्यासात्। ध्रियते मूर्ध्नि भूपालैरित्यनेन तस्य पद्मस्य योग्यंस्थानं मूर्धा। यतः पुष्पाणि राम०
॥७॥

रस्येवदीर्घते।इत्समःसकलरूपकमिदमित्युच्यते।समास्तपंकजधर्माभिधानात्।अकस्मादेवातिचंडिस्फुरि
त।अधरपल्लवोयत्र।तत्सन्मुखंघर्मांभसःकणाघर्मांभःकणाः।एवमंजर्य्यस्ताधत्ते।किंभूताःमुक्ताफलरुचः।मु
क्तानांमौक्तिकानांफलवद्दीधितिर्यासांतामुक्ताफलरुचः।मंजरीरूपस्यघर्मांबुमंजरीत्वेनघर्मांबुरूपितं।अध
रश्चपल्लवत्वेनरूपितः।अन्यथाकृता।अन्यथाकृतामनास्यं।मुखंतुनरूपितमिति।अतएवविधमेवपवरू
पकंनाम।ल्लितौक्कवौपत्रतद्दलितक्क।गलत्क्षरत्घर्मजलंवारियस्मात्तद्गलद्घर्मजलं।आलोहितेक्ष
णं।विवर्णीतिमदावस्थामीदृशींतेवदनपंकजंअधिकृतस्वरूपापिलामुखस्यांगानिमुखावयवान्मुखमेवा
रविंदंतानीतः।आननमेवारविंदत्वेनरूपितमतोवयविरूपकं।मुखस्यावयविनोरविंदत्वेनरूपणात्।म
देनपाटलौकंठोयत्रतन्मदपाटलंतेन।नेत्रेएवांगरूपकमेतत्।एवमनेनप्रकारेणहिप्रभृतीन्यपिअं
गानिरूपयंति।अत्ररूपकालंकारेयोगायोगौमुक्तलामुक्तलेभिदाकरौभेदकारिणौयोगायोगौउदाह
रणेःस्वयंसिद्धांति।स्मितमेवपुष्पं।स्मितपुष्पंतेनोज्वलं।स्मितपुष्पस्यावयविनोगानामवयवानांरू

र०टी० परांचकेषांचितरूपणाश्चपक्षरूपकं नामतद्व्यलितं रम्यंजायते। मदरक्तकपोलेनेति। कपोलत्वेनरूपितं
॥८॥ ।त्वन्मुखेंदुनेतिमुखमिंदुत्वेनरूपितं। नर्त्तितभ्रूलतेनेतिभ्रूर्लतात्वेनरूपिता।इतिविषमत्वेनरूपकं।हरिपादो
जयति। किंभूतः। शिरोलग्नजह्नुकन्याजलांशुकः। शिरोलग्नंजह्नुकन्याजलमेवांशुकंवस्त्रंयस्यसतथा। असु
8 रेभ्योवलिप्रभृतिभ्योनिःशंकाश्चतेसुराश्चेंद्रादयः तेषामानंदः सएवउत्सवःतस्यतत्रवाध्वजः। एतस्यविशेष
णांरूपकमुच्यते। विशेषणांसमप्रस्यकेतोरूपपर्यायदीदर्शपादेतस्यापर्ण्णांपुष्पोज्वलेलोलेचपलेनेत्रोत्प
लेएवलोलनेत्रेनेइति। एवमनेनप्रकारेणहिप्रभृतीन्यपिअंगानिरूपयसत्त्वात्रूपकेलोलनेत्रेभृंगोयत्र
- ततल्लोलनेत्रभृंगमिदंमुखमितिपुष्पद्विरेफाणांसंगत्यायुक्तरूपकं। यत्रपुष्पंतत्रद्विरेफइतिपुष्पद्विरेफ
योर्योगात्।युक्तरूपकमेतत्।अयुक्तरूपकमाह।इदमार्द्रस्मितज्योत्स्नाचंद्रिकायत्रतत्तथा॥स्निग्धनेत्रोत्प
लेयत्रतत्स्निग्धनेत्रोत्पलंइतिज्योत्स्नोत्पलयोरयुक्तंनामरूपकं१ज्योत्स्नोत्पलयोरसंयोगासंबंधाभा रम०
वादयुक्तत्वे।तथापुष्पद्विरेफयोगःसंगतिर्नैवंज्योत्स्नेंदीवरयोरितिअयुक्तमुच्यते।रूपकणादंगिनोध्वजे ॥८॥

दंडासु भवति। उत्सवे च तस्योद्धूद्रस्य चापि। न मीलयति पद्मानि न नभोप्यवगाहते। नापि नभोध्यास्ते। त्वन्मुखं
दुस्सदानन चंद्रमा मामासमानं हरणाय प्रभवस्यति। एतद्विलष्टं नाम रूपकं। कुतः। अक्रिया चंद्रकार्याणां पद्म
संकोच नभोगाहनां अन्यकार्यकार्यस्य च मरणास्य करणात्। गांभीर्येणासमुद्रोसीत्यादिहेतुरूपकं। कस्मा
त्। गांभीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः। कल्पद्रुमश्च क्रियते। गांभीर्यात्सागरो भवान् गौरवात्सांसर्वतः। का
मदत्वादभिलषितार्थदानात्कल्पवृक्षः। समुद्रादिकरणे गांभीर्यादिकं हेतुत्वेनोपन्यस्तं। राजहंसोपभो
गार्हं। राजहंसाश्वेतपक्षा१ पक्षिणः। अन्यत्र राजहंसाः श्रेष्ठा राजानः तदुपभोगार्हं। भ्रमरप्राप्त्यसौरभं व
क्त्रांबुजं मुखांभोजमिति श्लिष्टरूपकं। पद्मधर्मान्मुखधर्मादर्शनात्। इष्टसाधर्म्यदर्शनाद्वौयामुख्यमोः। उप
माः व्यतिरेकाभ्यां रूपकहितमयं यथा। गौर्यासासाधर्म्यदर्शनात्। उपमारूपकमुख्यस्यवैधर्म्यदर्शनात्। व्य
तिरेकं नाम रूपकवैधर्म्यमुदाहरति। अपमालोहितच्छायो मदेनमुखचंद्रमाः सन्नद्धोदमरागस्य चंद्रस्य
प्रतिगर्जतीति। मुखं चंद्रमा इति गौणांतस्यालोहितच्छायत्वं तस्या सन्नद्धोदमरागत्वं चेति। मुखेन चंद्रम

टि०टी०
॥८॥ मासाधर्म्यं प्रतिगर्जति। सन्नद्धोदयरागस्येति उपमाद्येति उपमारूपकमुच्यते। चंद्रमाःपीयते देवैर्मयात्वन्मु
खचंद्रमाः। असमग्रोप्यसौ शश्वदयमापूर्णमंडलः। असमग्रो ह्यसौ चंद्रमाः। अयं मुखचंद्रमाः शश्व
दापूर्णमंडलः। इति मुखेन चंद्रमसा ह्यमुखचंद्रस्य गौणस्य वैधर्म्यदर्शनात्। व्यतिरेकं च रूपकं। मुखचं
द्रस्य चंद्रत्वमिदमन्योपमापि न। नतिसुंदरि संवादीति। तस्यान्योपमापि न। तव मुखेंदोश्चंद्रत्वं न संवादि
। अन्योपमापि न इति विशेषमपि हेतुत्वेन। अन्यस्याप्युपमापजनकत्वात्। इत्येतदाक्षेपरूपकं। चंद्रध
र्मिणामाक्षिप्य रूपणात्। मुखेंदुरपि ते चंडि मां निर्दहति निर्दयं। इत्याक्षेपः। भाग्यदोषो ममैवेति। नि
दाहो नाम वह्निधर्मः। चंद्रधर्मो मिममैवाममदृष्टदोषान्मुखेंदोर्दोष इति समाधानरूपकं। मुखपंकजरं
गेस्मिन् भ्रूलतानर्तकी तव। लीलानृत्यं करोतीति। मुखपंकजत्वेन मुखपंकजमेव रंगः। भ्रूलता सैव नर्तकी
ति रूप्यं रूपकरूपकं। नेतन्मुखमिदं पद्ममित्यादि। मुखादित्वं निहृत्यैव पद्मत्वेन रूपणात्। उद्भासितगुणो
त्कर्षं तत्त्वापह्नवरूपकं। तत्त्वस्य मुखादेरपह्नवात्। इदानीमुपहरन्नाह। न पर्यन्ततो विकल्पानां रूपकोप एम० ॥८॥

मयोर्पितः। दिङ्मात्रं दर्शितं सद्भिरनुक्रमनमीपतामिति सुगमं॥ ॥दीपकालक्षणमाह॥ ॥जातिगु
ण क्रियाद्रव्यवाचिनैकत्रवर्तिना। महावाक्योपकारश्चेत्तदा तद्दीपकं यथा॥ जात्यादिवाचिनावाक्यैकदे
शवर्तिना सकलं वाक्यं द्योत्यते। दक्षिणो दक्षिणामाशां यातः पर्णजीर्णं हरती। वीरुधामिस्यादिनी पातःप
वनशब्द एव न तांगीनांमान मंगाय कल्पते। एतदपि द्योतितवान्। आदिक्रियादीपकमाह। चरंतीत्यादिनो
पालेन क्रियापदेन सकलं वाक्यं दीपितं। चतुरंभोधिवेलोद्यानेषु दंतिनश्चरंति। चक्रवालादिकुंजेषु तथा।
लोकाभिधानपर्यंततटेषु कटकेषु कुंदभासो गुणाश्चरंति। श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपंक्तिभिः
। श्यामलाइत्यादावुद्योतो गुणवाची शब्दः तेन सकलं वाक्यं द्योतितं। भुवनश्चनवशाद्वलहाजिभिश्श्यामला
ः। विष्णुना विक्रमस्थेन दानवानां विभूतयः। इत्यादावपतेन विष्णुना विक्रमस्थेनेत्यादिदीपकान्युक्ता
नि। एवमनेनैव प्रकारेणामध्यांतयोरपि वाक्ययोर्दर्शयिष्याभिकानि चितानि तद्यथेमुदाहरति॥ कला
पिनेति मध्यवर्तिना शब्देन जातिवाचिना सकलवाक्योपकारकेन नत्संगाम इति दर्शितं बध्नंतीचेति सर्वत्रक

दं०टी०

लापिइतिसंबध्यते। मंदोगंधवहः क्षारो वह्निरिंदुश्च जामते। चर्चा चंदनवातश्च शाल्मपातप्रवासिनी। जा
पतइसनेनमध्यवर्त्तिना क्रियापावासिनाशब्देन सर्वत्र संबध्यते। जलं जलधरो हीरं कुसुमं धन्वनो बलं॥
॥१०॥ कुलं गृहहारिखं हीनां पत्तदेवबलं। बलवज्रतडितां दामपत्तहुलं। बलमित्सनेन मध्यवर्त्तिना द्रव्यवाचिना सर्व
वाक्योपकारः॥ स पानीयो सलं करोस्मि रेशाल्मं शरासनेकृतं। मयापि मरणे चेतः कृतं। कृतमित्यनेन क्रि
यावाचिना अंतवर्त्तिना सर्ववाक्योपकार इत्यंतक्रियादीपकं। शुक्लः श्वेतार्चिषो वृद्धौ पक्षः। शुक्लः पक्षः
श्वेतार्चिषः। चंद्रमसो वृद्धौ। पंचशरस्य स्मरः। स च शुक्लार्चिः पंचशरस्य वृद्धौ। स च पंचशरो रागस्य वृद्धौ। रा
गोपि पूर्णा रसुस्तवस्मिमो वृद्धौ। इदं तावदादिदीपकं। आदौ पादे व्यवस्थितत्वात् वरणवाचिना शब्देन सर्वत्र
संबध्यते। तत्र हि शब्देन क्रियावाचिना सर्वत्राभिसंबध्यते। तथापि आदिदीपकेपि पूर्वपूर्वव्यपेक्षिणी।
पूर्वपूर्वव्यपेक्षात इत्येवं शीला वाक्यमाला प्रयुक्ता। पूर्णा रसुसत्वः श्रीरागमपेक्ष्य तो रागोपि पंचशरं पंच राम०
शरोपि चंद्रमसं स च शुक्लपक्षमिति हेतोर्मालादीपकमुच्यते। अवलेपं दर्प्पमनंगस्यावर्द्धयंति। बला ॥१०॥

हका मेघाः कर्षयति धर्मस्य अवलेपं मारुतेनोद्धताः शीकरा येषां ते तथाविधा वलाहकाः ।स्वयमेव
तद्व्याचष्टे ।अवलेपपदेनात्र वलाहकपदेन च ।क्रिये विरुद्धे संयुक्ते ।अवलेपपदेनाद्यो व्यवस्थितेन
यद्यप्यखिलवाक्योपकारः स्यात्तथापि वलाहकपदेन च व्यवस्थितेन सकलं वाक्यमुपकृतं ।तथापि
क्रिये विरुद्धे विरुद्धार्थाभिधायिकैः संयुक्ते वलवर्द्धनकर्षणलक्षणे ततो विरुद्धार्थदीपनाद्विरुद्धार्थदी
पकमिदं ।एकार्थदीपकमुदाहरति ।हरत्याभोगमाशानां गृह्णाति ।ज्योतिषां नक्षत्रतारकादि सचंद्र
मसं कीर्णतेजसां गणमाच्छादयति ।आदत्ते चाद्य मे प्राणानाक्षिपति ।असौ जलधरावलिः ।स्वयं
व्याचष्टे ।अनेकशब्दोपादानात्क्रियैवैका प्रदीप्यते ।हरति गृह्णात्यादत्ते इत्यनेकशब्दोपादानं ।तस्मा
देकैव क्रिया अभिधानार्था जलधरावल्यां स्थिता स्थिता प्रदीप्यते ।। एते मतंगजा हृद्यगंधवहेति ।हृद्य
गंधवहाः सुगंधदानप्रवाहाः तुंगा महांतः कृष्णाभा मातंगाः ।भ्रमंतीति मध्यवर्त्तिक्रियया यद्यपि सकल
वाक्योपकारः तथापि धर्म्मैर्हृद्यगंधवहादिभिः अभिन्नानां सदृशानामभ्राणां घनानां हस्तिनां भ्रम

द०टि० परोनैव संबध्यतेति हेतोः। श्लिष्टार्थदीपकं। अनेनैव विधानेन शेषाणामनुक्तानामपि दीपके ऽलंकारे
विकल्पानामनुगतिर्विधातव्या विचक्षणैः॥ ॥ अर्थाभिधेयः स आवर्त्तते यस्मिन्सार्थावृत्तिः। अर्थस्यावर्त्त
॥२२॥ नमर्थावृत्तिः। पदंस्युवर्त्तते उ भयावृत्तिः पदावृत्तिः उभयथार्थस्य पदस्य वावृत्तिः रूप यावृत्तिरिति त्रि
धावृत्तिः। दीपकस्थानएवेष्टमलंकारत्रयं। दीपकस्थानीयमेव। यथेसुदाहरति। अत्र प्रावृषि विकसंति क
दंबपुष्पाणिः स्फुटंतिः स्फुटविकसने विकसंति कुटजद्रुमाः। कुटजानामद्रुमाः कुटजपुष्पाणि। उन्मीलं
ति चकंदल्यः मील निमीलने वर्त्तते। उन्मीलनं विकसनमेव। दलंति ककुभानिच। दल इत्समंधातुर्विशरणे
उच्यते। विशरणंच विकसनमेव। तेन सर्वत्रैते विकासनमेवाभिधीयत इत्सर्थावृत्तिः। विकसंति स्फुटंति
उन्मीलंति दलंतिचेति पदभेदेप्यर्थाभेदात्। पादवृत्तिमाह। उत्कंठयति ऊर्ध्वकंठं करोति मेघानां मालावर्ग
कलापिनां मयूराणां मनांचोत्कंठयति उत्सुकमतिमानसंमकरध्वजः। यद्यप्युत्कंठयतीति पदं द्विरा
पतिततथार्थाभिन्नः। एकत्रोहीयतो परत्रोत्सुकयति। उभयथावृत्तिमाह। विश्वं जितामवानत्र विरस एम० ॥२२॥

वरोधनैः। विश्वं महीतलं जित्वा भवान् विहरति क्रीडति। अवरोधनैरंतःपुरस्त्रीभिः। विहरत्यप्सरोभिस्ते रि
पुवर्गो दिवं गतः ॥१॥ त्वया सह संग्रामेऽभिमुखीभूतानां प्रतीपः शत्रुसमूहः स्वर्गं गतः सन्नप्सरोभिः सह विहरति
। अत्र विहरतीति न शब्दो भिन्नो नाप्यर्थश्चेत्युभयस्य शब्दस्यार्थस्य वावृत्तिरित्युभयावृत्तिः। आक्षेपलक्ष
णमाह॥ ॥प्रतिषेधोक्तिराक्षेपः। प्रतिषेधवचनमाक्षेपः। इत्याक्षेपालंकारस्याक्षेपभेदानां साधारणं ततः। आ
क्षेप्यं ततः इत्याक्षेपाः। धर्मधर्मादिमत्तेषां भेदाः विशेषास्तेषामानंत्यात्तस्यादनंतताऽपर्यंतता। अनंगः पंचभि
र्बाणैः पौष्पैर्जगद्विश्वं व्यजयत विजितवानिति। इदमसंभाव्यं। न हि पंचभिर्बाणैः पुंसोऽनंगस्य जगत्स्य
जयः संभवतीति। इत्यनंगजयायोगबुद्धिः केनचिदाक्षिप्यते विचित्रा वस्तुशक्तीनां वैचित्र्यात्। अचिंत्यो
हि मंत्रौषधीनां प्रभाव इत्यनेन हेतुना। अनंगजयस्याप्रतिषेधात्तमप्रवृत्ताक्षेपः। कुतः कुवलयं कर्णे कर्णे
करोषि कलभाषिणि। किमपांगमपर्याप्तं पर्याप्तमेव। कर्णावतंसस्योत्पलकार्यकरणसामर्थ्यवत्तः किं
कुवलयावतंसेनेति। काचित्कांता कर्णे कुवलयं कुर्वत्येव प्रियेणाभ्यर्थ्य चाटुकारेण निरुध्यते। कर्णे कुव

दं०टी० लयमकार्षीस्त्वमिति वृत्तिमानाक्षेपः॥ सलंक्रमीमिनलंमांदृष्टुं वल्लभलप्स्यसे। किंविशिष्टेन अन्यावधु
वनसंक्रांतलाक्षारक्तेन। अपरस्त्रीचुंवनेनसंक्रांतोमोलाक्षारसस्तेन मद्रक्तंचक्षुस्तेन। अयंभविष्य
॥१२॥ दाक्षेपः प्रागेयपूर्वं वमेवापरस्त्रीचुंबनेनसंक्रांतोमोलाक्षारसस्तेन पद्रक्तंचक्षुस्तेना। अपंभविष्यदा
क्षेपः। प्रागेवपूर्वमेवापरस्त्रीसंगसंप्रमादतिमनस्विनीका चिकांतं प्रियं पस्मादरुद्धरुरोध। कदाचि
12 दपराधोस्य प्रियतमस्य भविष्यतीति। भाविभविष्यतिगम्यादपद्यत्तिभवतेरिन। इत्सनागतापराधम
तिविधानकरणादयंभविष्यदाक्षेपउच्यते। तवतन्वंगि मिथ्यैवरूढमंगेषुमार्दवं। कुतोमिथ्यैतत् अतो
पंयदिसत्संभवत्स्येवांगानि किमकांडएवरुजंतिमामितिसपेधर्माक्षेपः। मार्दवंनामयोगमाधर्मः सतांहि
रोधिनाकर्मणापतोपमुपकामुकेनाक्षिप्तमिति। सुंदरीस्वेषविवेकः। केनजायते यतः प्रभामात्रंहित
रलंदृश्यतेनान्नसंशयमः। दृष्टाश्रुफुल्लानिवुलानमताथ। स्मिकिंविदांतकार्याक्षेपः। मरणंनामयत्कार एम०
णांतराभुपः प्रतिषेधः मरणाकारणास्य विरहिणोजलदागमस्यसद्भावो॥ नचिरंममतापायतवयात्रा ॥१२॥

भविष्यति। परिपास्यसि पातव्या मित्यनुज्ञाक्षेपः। त्वयि गते क्षणमपि न जीविष्यामि ततस्त्वापो न भवि
ष्यतीति आलंबनो मरणं सूचयंत्या प्रियमात्रा निषिध्यते यतः। धनं च बहुलभ्यं ते इत्यादौ प्रभुत्वाक्षेपः। कु
तः। प्रत्याचक्षाणा मा निषेधं स्माहेतुकारणानि प्रियपात्रा विरोधिनः। यो हेतुः प्रियप्रस्थानं निषिध्यते सए
कोपि नास्ति। तथापि प्रियमास्माऽगाः। इति प्रभुत्वेन प्रियमात्रा निषेधो यतः। जीविताशा बलवती। इत्यना
रसाक्षेपः। यतो गच्छ वा तिष्ठ वा कांत इत्यनादरवद्वचः। प्रभुत्वमनुरक्तया। प्रियप्रयाणोस्या मांरुंधत्या निरु
कुर्वत्या। गच्छगच्छसीत्याशीर्वचनाक्षेपः। यस्मादाशीर्वादरवर्तिना आशीर्वादवचनेन कांतमात्रा निषि
ध्यते॥ ममापि जन्म तत्रैव देशो भूयाद्यत्र गतो भवान्। त्वयि गते क्षणमपि न जीवामीति स्वस्य मरणस्य सूच
नात्। यदि सख्येव रमणा मात्रा तेकाप्यान्याल्लीगच्छतीत्वया। अहं पुनरद्यैव रुद्धास्मि स्वीकृतास्मि। रंध्रा
न्वेषणेन क्षिद्रान्वेषणेन मृत्युना। भवता सह वियोगेन मरणमेवावश्यकमिति परुषाक्षरपूर्वकं स्वम
रणमावेदयंत्या यतः। कांतमात्रा निषिध्यते ततोयं परुषाक्षेप इष्यते। गंता चेद्गच्छेति। हे प्रिय यद्यवश्यं

टि० ष गंतामवान्न तर्हि गच्छत्वं। गंतेति भविष्यति लुट्। प्रथमपुरुषैकवचने लुटः। प्रथमस्य डारौरस इति डि नि
टिलोपे रूपम्। तूर्णं शीघ्रं तव कर्ण्यं तिपास्यति। पुरारवां पशब्दाः पुरायांतीति भविष्यति लुट्। पुरायोगे
॥१३॥ पुरायावं तो निवांतो निवंतो यो। आर्त्तबंधुमुखोह्रीणादिः खित्त वंधुनो दीर्घिताः। प्रयाणप्रति पंथिनः प्रया
णं प्रतिवधंतीति प्रयाणप्रतिवंधिनः इसेवंरीत्याः मयिमत्तापं महधुहृदस्तु कथं भवान्यास्यतीति सर्व
13 षसा त्रिव्याक्षेपः। स त्रिवो मासस्तस्य भावः सा विव्यं तेन प्रियप्रयाणनिषेधात्। गच्छेति वक्तुमिच्छामि मा
गा इति वाणी। निर्गच्छति मन्मुखात्। अहं किं करोमि। स एष पत्ताक्षेप उच्यते। अनिष्टवस्तु निकृतस्य प
त्वस्यानर्थक्योपदर्शनात्। आनर्थक्यं विपरीतफलोत्पत्तेः। गच्छेत्येतस्य विपरीतं फलं मा गा इति। प्रक्षि
तस्य मा गाः कृपास्यतीति समंगलमितथ्यतः क्षणादर्शन विघ्नाय पक्ष्मसंपातकुप्यतः। तव प्रयाणगमने प्र
र्णा मणोवद्वप्रभस्य मदीपस्य वहिः लपामदीयं प्रेमेयदृष्टव्यं। नाहं पक्ष्मसंपातकुप्यति प्रेमविरहव्य ए म०
थां सहिष्यते न वेति स एष परवशाक्षेपः। यस्मात्प्रेमपरतंत्रया प्रेमपराधीनया तया कांतया त्रायानि ॥१३॥

पिध्यते यात्वया प्रियतमस्यान्यर्पस्मरणास्यो पदर्शनात् । स हि ध्येवि रहाभिसाधुपायाक्षेपः । यतो
दृश्यांजनन्यासनामोपायः । सुदुःकरः तन्मसा पमुः प्रस्थानं स्थ्यते ज्वरहरतक्षकं चूडालंकाररवदस्या
शक्यानुष्ठानत्वात् । प्रहृतौ वमुखाद्वाराणी । प्रयामीति गच्छामीति वर्तमानसामीप्ये वर्तमानवद्वेति लि
मङ्‌र्थे लिङ्‌विधानं । इदानीं हे मम वल्लभ भ्रम पत्तागच्छतापि लपामपि मंदप्रेम्णा विगतस्नेहेनास्थिते
नापि किं । रोषाक्षेपोयंनाम । उद्रिक्तस्नेह निर्यन्त्रणालनास मधिकस्नेहविनिमपालनासंरब्ध कुपि
तमारब्धं प्रयाणं निषिध्यते । नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितं । स्त्रीभिर्नादृतं स्वीकृतं मधं चक
षेन निक्षिप्तं लद्विषां दीधिकास्वेव विशीर्णं मुसलं । असावनुक्रोशाक्षेपः । सानुक्रोशस्त्वोसलं । तद्योग्य
उसलयोग्यपलकर्णाघ्राणाच्चुतं सकरणादिव्यावर्तना । द्विभावं प्रभावं प्रदर्श्य शोच्यावस्थोपदर्शनात्
। अर्थो न संभृतः कश्चिद् विद्यादि नुशयाक्षेपः । यस्मादनुशयाक्षेपः । यस्मादनुशयपश्चात्तापं मधिकं यथा
भवत्येवमर्थार्जनादेर्व्यावृत्तिर्दर्शिता । सर्वंगतायुषा हृदं नकेनापि । अमृतामन्यम् तस्वभावे । यथानी

दि॰ टि॰ द्विष्टरिपुजनप्रतिस्पर्द्धिनि। स्निग्धतारके अक्षिणी यस्य स्निग्धतारके यत्र मुखेंदौ आननचंद्रे एकस्मिन्मति दू
रे स्थाः मुखेन किमिंदुर्नेति मुखेंदुराक्षिप्तः। मतिवद्दूरेस्था किमिंदुनेति अनेन गुणानन्मतामकारी न्तोया
॥२४॥ चंद्रवर्तिनः। तत्समानं मुखस्य चंद्रसमानदर्शापि लेति स्निग्धनक्षेपस्तथाविधः। किमयं शरदंभोदः किंवा हंस
14 कदंबकं। शरदंभोदहंसकदंबकयोधवलिम्नासादृश्यते विभ्रांतचित्तस्य संशयमउपजायमतो ससंशयाक्षेपो
निषेधः। रुतं कूजितं नूपुरसंवादि नूपुरस्वानुकारि सूयते तन्न तोयदः शरदंभोदः किंतु हंसकदंबकमेवारुतं
नूपुरानुकारीसनेन संशयस्याक्षिप्तत्वात्संशयाक्षेपः। विक्रमाक्रांतविश्वोपि विक्रमस्तेन तुप्यति। कदाचिद्वा
हृदृश्यते दृश्यते तत्र शिरः कीरस्य हविर्भुजः। अयमर्थांतरक्षेप उच्यते। यत्र आक्रांतसकलमहीतलोपि विक्र
मस्तव न शाम्यतीति। अनेन प्रवृत्तो विस्मयो येन निवर्त्येति निषिध्यते। अर्थांतरस्याग्रे प्रदर्शनात्। स धर्मि
णः विक्रमसमानस्य। नश्यमसेन नरेंद्रलं ददासीति करचन। दामालमिति न स्तोतुमर्हसि। स्वमेवात्मी
यलेह मत्वा गृह्णाति। मसस्तद्धनमर्थिनः। तव सत्यागो हेतुः। सचत्यागलक्षणो हेतुराक्षिप्तः। यतो भव राम॰ ॥२४॥

दीपं पहितं तत्स्वकीयमिति मन्वाहे — क्षेपः। अनयैव दिशान्येपि विकल्पाः शक्यमूहितुं। किं तदिसा।
दिवुमुक्तायां विकल्पमिसमभिधीयते। अन्यथा विकल्पाः शक्या जहितुमिति स्यात्॥ तदुक्तं भाष्यकारेण
।नशाकयं चूरमयहर्तुमन्यथा॥ ॥अर्थान्तरन्यासलक्षणमाह॥ ॥ज्ञेयः सोर्थान्तरन्यासो वस्तु प्रस्तुत्य किं
च। तत्साधनसमर्थस्य न्यासो योन्यस्य वस्तुनः। वस्तु किंचित्प्रस्तुत्य तस्य वस्तुनो यस्साधनं वदन्यद्वस्तु तस्य
न्यास उपस्थापनं सोर्थान्तरन्यासः। प्रकृतादन्यो यः सोर्थान्तरन्यासः। तमहद्दउदिशति। विश्वं कृत्स्नं व्याप्नोसे
वं शीलमुद्धर्मात्तत्साधुर्वा विश्वव्यापी। विशेषे कस्मिन्भिन्नहि वर्तितेतिष्ठतीति विशेषस्थः। श्लेषेणानेका
र्थवाचिनान्वितः। शेषाविद्धः। विरोधो विप्रतिषेधः। सहानवस्थानलक्षणमः परस्परपरिहारस्थितिर्वसो
स्यास्तीति विरोधात्वान्। अयुक्तमसंबद्धं करोतीति अयुक्तकारी। युक्तः संबद्ध आलापस्यासौ युक्तात्मा। यु
क्तश्चासावात्मा च। युक्तश्चासावयुक्तश्च युक्तायुक्तः। तथास्य युक्तो यो विपर्ययो व्यत्ययः। अयुक्तायुक्तः। इ
त्येवं प्रकाराभेदाः। अर्थविशेषाः प्रयोगेषु अस्यार्थान्तरन्यासस्य काव्यादिषु लक्षिताः। उदाहरमालाया[illegible]

टि॰टी॰ श्वव्यापी महतीनां रूपव्यक्त्यै तनुश्च रूपस्य घनापनिद्रूपतें॥ ॥भगवंतौ कृतिनौ जगतस्त्रिभुवनस्य नेत्रे सूर्या
चंद्रमसावपि पश्यगच्छत एवास्तंगच्छत इत्यत्र क्रियापदासंरत एवकारोऽसम्भायोगं व्यवच्छिनत्ति तदुक्तं। विशे
॥१५॥ षणविशेष्याभ्यां क्रियया च सहोदितः। व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेकतः। अयोगं योगमपरैरत्यंतायोग
मेव च। इति प्रस्तुतस्यान्यवस्तुनः साधनसमर्थस्य त्या समन्यस्य वस्तुनः। ‾ थाः निपतितः केन लंघ्यते। निपतितः अवश्यं
15 भवितव्यता केन लंघ्यते न केनापीति किमासर्वनाम्नां सामान्याभिधायिनां नियते रुलंघिनीयता प्रतिपादनं वि
श्वं व्याप्नोतीति विश्वव्यापी। विशेषस्य मुदाहरति॥ ॥पयोमुचः परीतापं हरंत्येते शरीरिणामित्युपन्यस्य वस्तु
तत्साधनसमर्थस्यान्यस्य वस्तुनोन्यासः। तथा सलवाभो महतां परदुःखोपशांतये। महतामात्मलाभोनकनीय
सामिति विशेषस्थः। श्लेषाविरुद्धमुदाहरति॥ ॥उत्पादयति लोकस्य प्रीतिमलयमारुतः। एतद्देवोत्तरार्द्धे
नसमर्थयति॥ ननु दाक्षिण्यसंपन्नः सर्वस्यो वहंति प्रियं। दक्षिणस्य भावो दाक्षिण्यं तेन संपन्नः कस्य प्रियं ग्रम॰
नावहति सर्वस्य सुखमावहतीति। दाक्षिण्यं दक्षिणादिग्भावो वा पीरन्यत्र दाक्षिण्यमुपरोधशीलता अ ॥१५॥

मुकंपपरतावेतिश्लेषाविद्धः।विरोधवानुदाह्रियते।जगदाह्लादपक्षेषः मलिनोपिलांछनवानपिनिशाक
रःस्वयंमलिनस्यजगदाह्लादकारित्वंकथमितिविरोधः।अनुगृह्णातिहिपरान्स्वयंसदोषोपिद्विजश्चरइति
विरोधवान्।पुक्ककारीउदाह्रियते।मधुपानकलात्कंठान्निर्गतोप्पलितांधतिः।कटुर्भवतिकर्णस्यकामि
नीदयितास्वमंगलंसमानानांकटुत्वमेवसमर्थयते।पापमीदृशंकामिनामितिसपुक्कंकरोतीतिसपुक्ककारी।म
धुपानकलात्कंठान्निर्गतोप्पलितांधनिः।कलिकर्णमधुरइतिपुक्कं।एतद्विपरीतमितिसपुक्कात्मोच्यते।अयमं
भो—————किंविशिष्टस्येत्याह॥उभयपवर्त्तिनः।उभयत्रसमुद्रपुरुषयोर्वर्त्ततइतिउभयवर्त्तिनः समुद्रस्यभव
तश्चवपुरेवभिन्नंनान्यथाभावमन्यदित्येके—वपुषाव्यतिरिच्यमानत्वादेकव्यतिरेकउच्यते।अभिन्नवेलो
भिन्नमर्यादोगंभीरोंबुराशिःसमुद्रोभवानपीत्युभयोःसादृश्यंभिन्नवेलादीनांआपाद्य१व्यतिरेकधर्म्ममाह
।असावंजनसंकाशःसमुद्रःकृष्णवर्णः।त्वंपुनश्चामीकरछविः तप्तकमककद्युतिरित्युभयव्यतिरेकोयं।चभयोः
१ धर्म्मो :समुद्रपुरुषयोर्भेदकौविशेषकारिणौ+कार्ष्ण्यकृष्णत्वापिशंगतागौरताचयत्तत्स्मात्स्यपगदर्शितोभिन्नावु

स ३

दि०टि०

॥१६॥

16

क्रमाविसाहः। त्वं समुद्रश्च दुर्वारो दुःखेन वार्यत इति दुर्वारः। तथा दुष्टं वारि उदकं क्षारं यस्य स दुर्वारो दुःपापार्थे सम
स्यते। तेन कुगतिप्रादय इति समासः। महत्सत्त्वं यस्य स महासत्त्वः त्वं तथा महान्तः सत्त्वाः करिमकरमत्स्यादयो यत्र
स महासत्त्वः तौ। तथा हे तेजसा क्षात्त्रेण परैरनभिभवनीयेन वर्त्तत इति सतेजास्त्वं समुद्रोपि महातेजा महत्ते
जो वडवामुखप्रभवो यस्य तौ सत्तेजसौ। इत्थं समुद्रस्य भवतश्च दुर्वारादिभिर्धर्म्मैः साम्यमापाद्य व्यतिरेक
मापादयति। इयता पुनरनयोर्भेदः समुद्रो जलात्मा जलस्वभावः पटुर्भवान्सरस एष श्लेष इति गृह्यतां। कुतः श्लेषरूप
त्वात्। श्लिष्टं भिन्नमनेकार्थमिति वचनात्॥ सह आक्षेपेन वर्त्तत इति साक्षेपः। तथा सह हेतुना वर्त्तत इति स
हेतुः। दर्पितां तदपि द्वयं। तत्र साक्षेपमुदाहरति। स्थितिवानपि धीरोपि रत्नानामाकरोपि सन्॥ मकराकरो भ
वानिव स्थितिमत्त्वादिगुणसंपन्नोपि तव कक्षां भवतां साम्यं न यास्यवेति प्रतिषेधो क्रियाक्षेपः। प्रतिषेधो
पि मलिनो मकरालयस्त्वं पुनर्निर्मल इति स आक्षेपोन्यतिरेकाख्यो य आख्यातः सहेतुरुच्यते। वहन्नपि म
हीं कृत्स्नां सशैलद्वीपसागरां। महीशेषो नागराजो वहन्नपि दधानोपि सन्नोनि क्लिष्यते। न विशिष्यते। कस्मा

राम०

॥१६॥

भुजंगानामुरगाणां भर्तृभावात्। बिभर्तीति भर्ता भर्तुर्भावो भर्तृभावः। तस्माद्भर्तृभावात्। भुजंगाधिपत्वाद्धेतो
:। त्वं पुनर्भुजंगानां विटानां भर्ता। किं तु आर्याणामिति शब्दोपादानसादृश्ये व्यतिरेकोपमीदृशानंतरोक्त्वाख्यातः
।इदानीं प्रतिपमाजसादृश्ये व्यक्तिव्यतिरेकः सोभिधीयते। त्वन्मुखं कमलं चेति द्वयोर्मुखकमलयोर्भिदा भेदः
।अत्र मुखारविंदयोर्न शब्दोपात्तं सादृश्यं किंतु प्रतिपमानं कांतत्वमिति प्रतीयते सादृश्यं वस्तु नो द्वयोर्मध्ये
द्रकथनं स व्यतिरेक इति।।व्यतिरेकार्थमाह।कमलं जलसंरोहि जलाधारं। त्वदीयं मुखं तु त्वदुपाश्रयं।। त्वम्
आश्रयो यस्य त्वदुपाश्रयं। त्वदाधारं। अविद्यमानो भ्रूविलासो यत्र तदभ्रूविलासं। अस्पष्टो मदरागो येन तदस्प
ष्टमदरागं सरोरुहं। इदं तु नयनद्वंद्वं तव तद्गुणाभूषितं। भ्रूविलासमदरागभूषितमिति व्यतिरेकः। स्वरूपमेव
भ्रू।मपि विभागीकृत्य सर्पौनरुक्त्यपरिहारात्। व्याचष्टे। पूर्वस्मिन् त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदेति
।अत्र भेदमात्रोक्तिः मुखकमलयोर्भेदमात्रातिरिक्तं कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयमित्यनेन नु पुनराधि
क्यं दर्शितं। अभ्रूविलासमस्पष्टमदरागं सरोरुहमित्युक्तं। इदं तु नयनद्वंद्वं तव तद्गुणाभूषितमित्यनेन सरोरु

दं०टी० हान्मुखस्याधिक्यदर्शनात्। वैलक्षण्यं सादृश्यव्यतिरेकस्य च सादृश्यं प्रदर्श्य द्वयोर्वस्तुनोः सतोर्भेदकथनमिति
सादृश्ययोर्व्यतिरेक इति। स च पुनरन्यः पूर्वस्माद्भिन्नं प्रदर्श्यते। त्वन्मुखं पुंडरीकं च॥ उभे फुल्ले तथा सुरभिगंधिनी
॥१७॥ । मुखकमलयोः फुल्लत्वादिना सादृश्यं। व्यतिरेकमाह। भ्रमद्भ्रमरमंभोजं लोलदृष्टि मुखं तव। सुगमं च॥ चंद्रोयमं
17 बरोत्तंसः। उत्तंस इव उत्तंसः शिरोमंडनं कुसुममुत्तंसः शिरोमंडनं कुसुममुत्तंस उच्यते॥ हंसोयं तोयस्य भूषणं जल
स्याभरणं। नभो नक्षत्रमालीदं नक्षत्रमाला अस्यास्तीति नक्षत्रमाली व्रीह्यादिषु पाठादिनिः। इदमुत्कुमुदं पयः। उ
द्गतकुमुदं पयः। उपमा च यथोप्रतीयमानसौक्ष्म्यादिसाम्ययोर्वियदंभसोः। भेदः कृतः परस्परं वैलक्षण्यं कृतं। त
था प्रतीतिशुद्ध्योश्च चंद्रहंसयोरस्मिन्भेदः। कृत इति प्रतीयमानशब्देनानुपात्तं शौक्ल्यादिना साम्यं समनताप
योः प्रतीयमानेन शौक्ल्यादिसाम्ये वियदंभसोस्तयोरस्मिन्भेदः कृतः। नभसस्तावत्तोयाद्व्यतिरेको नक्षत्रमा
लीत्यनेन शब्देन पयस — नभसो व्यतिरेकः। उत्कुमुदमित्यनेन चंद्रोयमंबरोत्तंस इत्यनेन हंसचंद्रस्य व्यति
रेकः। हंसोयं तोयभूषणमित्यनेन हंसस्य चंद्राद्व्यतिरेक इति। कथंभूतयोः प्रतीतशब्देनानुपात्तः शुद्धिर्द्वौ राम०
॥१७॥

वल्यं तयोरिति पूर्वञ्चशब्दवत्साम्यमुभयत्रापि भिदकां भृंगनेत्रादिल्लमदमूमरसंभोजमिति लोलदृष्टिमुखं तवेः
ति तत्र भृंगनेत्रा धन्योन्यसदृशामिति तस्मात्सदृशव्यतिरेकस्य पुनरन्यः प्रदर्श्यत इति यदुक्तं तदुपसंहृतं
।तदेवं भिन्ना भिन्नजातीनाव्यतिरेकमभिधायजातिव्यतिरेकमुदाहरति। अरत्नालोकसंहार्य्य। रत्नानां
वैदूर्यपद्मरागादीनां आलोकः प्रभा रत्नालोकः। तेन संहार्य्यत इति रत्नालोकसंहार्य्य। अरत्नालोकसंहार्यम
लदीप्याऽपनेतुमशक्यं। तथाहार्य्य आहर्तुमशक्यं॥ सूर्यरश्मिभिः। दृष्टिरोधकरं लोचनाधकरं। यूनां यौवन
मदोद्धतानां। यौवनप्रभवं तमो रागविशेषः। स्वयं व्याचष्टे। स्वजातिव्यतिरेको मं तमो रागाख्यं तमो दृष्टिरोधि
तमा तुल्यं तद्दर्शनव्याघातकत्वे न समं भिन्नमन्यैरत्नालोकसंहार्यं सूर्यरश्मिभिः अहार्य्यं तमो भेदमन्ये
स्तमोधर्मैर्भिन्नमदर्शयन्॥ ॥विभावनामाह॥ ॥प्रसिद्धहेतुव्यावृत्त्याभावेन यत्किंचित्कारणांतरं। यत्र
कार्ये विभाव्यते निनीयते सा विभावनोच्यते॥ तथासर्गिकत्वं वास्वाभाविकत्वं वा यत्र विभाव्यं सा विभावना
।तामुदाहरति: स्वयमपि। ॥ अपीतक्षीवकादंब पानपीतेन पुंसके भाविकः। न विद्यते पीतं येषां ते पीता

दं०१०

॥१८॥

18

ःअथवापीतशब्दोस्ति येषां ते पीताः। राजादिषु पाठात्। अपीताः क्षीबा मत्ताः कादंबा हंसा यत्र तादृक्पीतजीवका
दंबं असंमृष्टामलांबरं। न संमृष्टं असंमृष्टं न संमृष्टं ते संमृष्टं। तथा मलं निर्मलं। अंबरमाकाशं यत्रा अप्रसा
दितं कनकफलादिना प्रसादनीयेन द्रव्येण न प्रसादितं। तथाविधं सूक्ष्ममंबुउदकं यत्र तत् अप्रसादितसूक्ष्मांबु
क्षीबत्वे हेतुः प्रसिद्धः सुरापानं। अमलत्वे हेतुः संमार्जनं। पुनः स्वच्छत्वे प्रसादनहेतुः॥ स च अपीतादिपदैर्व्या
वृत्तिः क्षीबत्वादिकार्यं चान्यकारणपूर्वकमुक्तं। यतो जगदासीन्मनोहरं। अत्र जगतो मनोहरत्वे कारणं शर
शारत्समयः स इह विभाव्यत इति विभावना। अनंजितापि कज्जलेन तथाप्यसिताक्षिगोलकाद्दृष्टिर्नयनयुगलं
। भ्रूलता वर्जितापि उन्नमयकोट्योरुन्नमीकृतापि मध्ये तथापि रेचिता। अनमता मध्ये अनमता कीर्या नतावा
तथा अरंजितोरुणश्चायमधरः। अरंजितो लक्तकादिना पाटलेन द्रव्येण तथाप्यरुणो लोहितश्चाधरस्तव
सुंदरि। अत्र दृष्टेः लितत्वे प्रसिद्धो हेतुरंजनं तदभावप्रदर्शनाद्विभावना। एवमितरत्रापि योज्यं। स्वयमेव
व्याचष्टे। यदपीतादिजन्मस्यात्क्षीबतादि सादिकथं भूतमित्यादि। जन्मन विद्यते पीतादिभ्यो पानादि राम०

॥१८॥

न्योपन्यप्रादुर्भावोपस्यतदपीता।दिमन्म। किंलन्यहेतुजं।अन्यः प्रसिद्धो हेतुरन्यहेतुः तस्माज्जातमन्यहेतु
जं।अविद्यमानहेतुकं च तस्योभयस्याहेतुकस्य च विवक्षितस्य विरोधित्वाद्विरोधाभासः वक्त्रं निसर्गसुरभिःत्व
पुष्पाजसुंदरं।अकारणारिपुश्चंद्रोनि। मित्तःसुहृत्स्मरे।जातीफलादिमुखवासरहितमपि मुखं निसर्गेण
स्वभावेनैव सुरभि।आभरणादिनाव्याजेनापि रम्यं।चंद्रोदयतज्जनितवियोगाद्यथापीडितात्संजातमनो
रथभावाद्रोचनानां निमित्तं वैरी निर्निमित्तः उपकारनिरपेक्षः सुहृन्मित्रं मन्मथः।निसर्गादिपदैरत्र हेतुः सा
क्षान्निवर्तितः।हेतुभावे फलंकार्यंलसुरभित्वादिकं।सा विभावनेयुपसंहृतं।समासोक्तिलक्षणमाह॥
॥वस्तु किंचिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः।उक्तिः संक्षेपरूपत्वात्सा समासोक्तिरिष्यते।वस्तु किंचिदनिष्ट
दुष्टमनभिधेयं चेतनमचेतनं वा अभिप्रेत्य मनसि निधाय तत्तुल्यस्याभिप्रेतवस्तुसदृशस्यान्यस्य वस्तु
नो यदभिधानं उक्तिः सा समासोक्तिः कथ्यते।कुतः पुनरेवंविधोक्तिः समासोक्तिः संज्ञां लभत इत्यत आह।संक्षि
प्तरूपत्वात्संक्षिप्तं रूपं यस्याः सा संक्षिप्तरूपा तद्भावात्।तामुदाहरणेन स्पष्टयति।पिबन्मधु यथाकामं भ्र

दं०टी० भ्रमरः फुल्लपंकजे। अप्यसंनद्धसौरभ्यं पश्य चुंबति कुड्मलं। इति पौढांगनाबद्धरतिरागस्य कामिनः कस्यांचि
द्वालायामिच्छावृत्तिर्विभाव्यते। सुगमं। विशेष्यमात्रभिन्नापि: विशेष्यमेव केवलं यस्याः सा विशेष्यमात्रभिन्ना:
॥१९॥ तुल्याकाराणि विशेषणानि यस्यां सा तुल्याकारविशेषणा। सा तावदिका समासोक्तिरस्ति। तथाप्यपराप्यस्ति
भिन्नानि विसदृशानि अभिन्नानि चोपमसाधारणानि यस्यां सा भिन्नाभिन्नविशेषणा। एवं द्विःप्रकारां तांय
थाक्रममुदाहरति। रूढं मूलं यस्य वृक्षस्य स रूढमूलः। पुरुषस्य कोप्यभिप्रेतोभिधातुं यः रूढमूलः। रूढं मित्र
पुरोहितादिमूलं बलं यस्य: फलभरैः पुष्णन्नतिश्च मर्थिनः। वृक्षस्य फलानि प्रतीतानि। पुरुषस्य फलभरैः समी
हितासिद्धिरिति। अर्थिनो याचकान्युष्मन्। सांद्रछायाय यस्य सः सांद्रछायो बहलछायः। पुरुषस्य सांद्रलाघः
कांतिमान्। छायाकांतिरुच्यते लावण्यमित्यपरे। महावृक्षः सोपमासादितोमया। लक्ष्यइत्यादि। अनल्पो वि
टपानामाभोगो यस्य सोनल्पविटपाभोगः। फलपुष्पसमृद्धिमान्। सच्छायैः स्थैर्यवान् छायाधरत्वादेव स्थैर्य
वान्। पुरुषः सौवीर्यवान्। अचलो वृक्षः। नन्वेषमयादैवासुरायादासादि तदिति द्वितीयः। उभयत्र। उभयस्या राम०
॥१९॥

मुभपत्रवासादावितिपुंवद्भावात्। स्त्रीत्वस्य निवृत्तिः। पुमान्कास्त्रिद्वृक्षत्वेनोपचारितः। सर्वसाधारणधर्मा रू
ढमूलः। फलैरैरिसादप॰ वृक्षस्य पुरूपस्येति विशेषमात्रं भिन्नमेकत्र पुमानन्यत्र वृक्षः॥ निवृत्तो व्यालैर्दुर्ज
नैः संसर्गो यस्य तथा व्यालैः कुरनकैः निसर्गेण मधुरआशयो मनः पुंसः समुद्रस्याशयो जलाधारो यस्यासौ
निसर्गमधुराशयः। अपमित्यंभूतो भोनिधिः कालेन परिशोष्यते। इत्यपूर्वसमासोक्तिरियमुच्यते। कुतः। पू
र्वधर्मनिवर्त्तनात्। पूर्वधर्मो भोनिधेर्व्यालसंसर्गः तथा मधुराशयत्वं तयोरनिवर्त्तनात्। निवृत्तव्यालसंसर्ग
निसर्गमधुराशय इति वचनात्। समुद्रेणोत्थंभूतेन समानस्य पुंसो व्यावृत्तिसूचनात् अवसानाभिधानात्।
अतिशयोक्तिलक्षणमाह॥ ॥ विवक्षया विशेषस्य लोकसीमातिवर्त्तिनी॥ असावतिशयोक्तिः स्यात्। लो
कसीमातिवर्त्तिनी विशेषोक्तिर्यत्र विवक्ष्यते सातिशयोक्तिः स्यात्। अलंकारेषु सर्वभावख्यानादिषु उत्तमा—
थेत्यादिना तामुदाहरति। मल्लिकानां माला तद्धारं बिभ्रतीति मल्लिकामाल्यभारिणः। इष्टकेषीकामाला
नां वितनूलभारिष्विति ह्रस्वत्वं। सर्वांगीणावदार्द्रचंदनाः। क्षौमं सुश्लक्ष्णं वस्त्रमासामस्तीति ताः क्षौमवस्त्राः। न

लक्ष्यंते ज्योत्स्नामामभिसारिकाः पुंश्चल्यः। कथमियमतिशयोक्तिः स्वयमाह। चंद्रातपस्य चंद्रतेजसो बाहुल्यं
सं०टि० बहुलत्वं उत्कर्षं उत्कर्षवत्तया। संशयातिशयोक्तिनिर्णयातिशयादीनां रूपव्यक्तौ निदर्शयितुं उदाह्रियते। तत्र संश
यातिशयोक्तिं तावदुदाहरति। स्तनयोर्जघनस्याऽपि मध्येऽमध्यस्य अंतराले मध्यहेतिं विनि किमस्ति उत ना
॥२०॥ स्तीति संदेहो न मे ध्यापि निवर्तते। इत्येषा संशयातिशयोक्तिः। मध्यस्य कृशत्वातिशयप्यावर्त्तनात्। निर्णया
20 तिशयोक्तिमुदाहरति। निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनि। कुतः। स्तनयोर्जघनस्याऽपि मध्ये मध्यमस्ती
ति निर्णेतुं शक्यमस्तीत्यर्थापत्तिप्रमयानुपन्यसति। अन्यथानोपपद्येत पयोधरभरस्थितिः। परिस्तनयोर्ज
घनस्यान्तरालमध्यं नास्ति तदा पयोधरस्यावस्थानमेव न स्यात्। इत्यर्थापत्तिप्रमया मध्यस्यास्तित्वनिर्ण
योऽतो निर्णयातिशयोक्तिः॥ ॥अहो विशालमित्यादिका विस्मयोक्तिः। यशोराशेर्महत्त्वख्यापनात्॥ अ
लंकारांतराणामपि स्वभावाख्यानादीनामपि आहुरेकं परायणं शरणं। वागीशो महितामुक्तिमिमाम एम०
तिशयाह्वयां मतिशयोक्तिः सर्वोप्यलंकारोऽतिशयोक्तिपुरुषएव शोभां लभत इति। अतिशयोक्तिं सर्वो ॥२०॥

ष्यलंकारोऽनुवर्त्तत इत्यर्थः। उत्प्रेक्षालक्षणमाह। अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते य
त्र तामुत्प्रेक्षां विदुर्बुधाः। अन्यथैवान्येन प्रकारेणान्यथा वृत्तिर्वर्त्तनं वृत्तिः स्वभावः। चेतनस्यात्माधिष्ठितस्य बु
द्ध्याधारस्याचेतनस्य वस्तुनोऽन्येन च प्रकारेणान्यथा यत्रोत्प्रेक्ष्यते विकल्प्यते तामुत्प्रेक्षालंकारं प्रचक्षते। य
थेत्यादिना तामुदाहरति। मध्यंदिनेऽर्कः मध्याह्ने भास्करस्तेन संतप्तो गजः सरसीं गाहते· इति स्थितां वृत्तिं अन्य
था कश्चिदुत्प्रेक्षते। मन्ये मार्त्तंडगृह्याणि रविपक्षपातीनि पद्मान्युन्मूलयितुं उद्युक्तो गजः। येमादित्येना
हं तापितः। तस्योदये पद्मानि विकसंति· तदस्तसमये च निमीलंति· तान्यहं तावदुन्मूलयामीति। निरसितुमरि
मिच्छोर्पितदीपाश्रयेण श्रियमधिगतवंतस्तेऽपि हंतव्यपक्षे इत्यहं मन्ये। स्वयं व्याचष्टे।। गजः सरसीं गाह
ते स्नातुं पापयः बिसानि पद्मांकुरान अर्तुं तान मन्ये इति कविना पुनरन्यं गजस्य स्थितां वृत्तिरन्यथोत्प्रे
क्ष्यते। न हि वैरनिःक्रमायते न तापकारिणा रविणा सह महद्वैरं द्वेषः तन्निबंधननिःक्रमायेत्युत्प्रेक्षणादुत्प्रेक्षा
इति। चेतनस्य गजस्य अन्यथा स्थितां वृत्तं अन्यथोदाहृत्याचेतनस्योदाहरति। कर्णस्य भूषणमिदं नीलो

दं०टी०

॥२२॥

21

सलमवतंसीकृतं।कथंभूतस्येत्साह।ममापतिनिरोधिनः।ममापतिरायामोदैर्घ्यंमदामतिस्तांनिरुध्यह्री
सेवंशीलोमदायतिविरोधीतस्य·कर्णोत्पलंदृष्ट्वालोचनस्यकिरणोः स्यरूपेतवाननवास्यरूपेतः।कविनापुन
रित्स्यमुत्प्रेक्ष्यकथ्यतेइतिसुबोधं।लिंपतीवतमोंगानिवर्षतीवांजनंनभः।असत्पुरुषसेवेवदृष्टिर्निष्फलतां
गतां।पिनष्टिपमात्रेरूद्धेः फेनेनचंदनतरोदापकवेरिवुपनीवतिवतिगाणा।।इतीदमपिइत्यादिकमपि।भू
पिष्टंसुष्टुमहत्उत्प्रेक्षालक्षणान्वितंनोपमालक्षणान्वितमित्यर्थः।इयमुपमानोत्प्रेक्षेतिकुतोभ्रांतिरित्यत
आह।।केषांचिदुपमाभ्रांतिरनुपमायामुपमाभ्रांतिः मिथ्याज्ञानंभ्रांतिरिवशब्दसालिंपतीववर्षतीवपिनष्टीवे
त्यादौसाइवशब्दस्तेरिवशब्दश्रवणात्पानाथतेकिलवशब्दादपःउपमाद्योतकालिंपतीत्यादिषुचेवशब्दमाक
र्ण्यउपमामन्यंतेकेचित्।।किंकृत्वामन्यंतेत्याह।नोपमानतिङंतेनेत्याभिक्रमात्प्रभाषितं।आख्यातपदेन
क्रियावाचिनःउपमानोपमेयभावोनास्तीतिपदार्थेरूक्तंतदुक्तंग्रंथकृतःपुनर्व्वीडतिनोपमानंअस्तीतिअ
तआह।उपमानोपमेयत्वंतुल्यधर्म्मव्यपेक्षया।तुल्यधर्मापेक्षया तुल्यधर्मापेक्षैसत्यपधर्मसाधारणामुप

राम०

॥२२॥

मानोपमेयभावः। लिंपतीति डं। तस्य पदस्य तमस्यश्चासौ साधारणो धर्मः कोनु समीक्ष्यते न कोपीत्यर्थः। य
दि लिंपनमेवेष्टं। लेपनमेव यदि उपमानोपमेययोस्तुल्यो धर्मोभिमतस्तदा तस्मात् लिंपतिर्नामकोप
रः। ततो लेपनादन्यः कोपि भिन्नो लिंपतिर्नाम धर्मो न कोपीत्यर्थः। स एव लिंपतिधर्मो लेपाभिधानो भ
वति भवति। धर्मी स एव लेपनधर्माधारस्तत्राह। स एव धर्मो चेति। स एव लिंपतिधर्मश्च भवति। लेपना
ख्यः तदा धर्मी च स एव लिंपनधर्माधारः स एव धर्मो धर्मी तत एवं तदेव एवं विधमसंबद्धमुन्मत्तो यः पुमान्स
एव भाषते। धर्मधर्मिणोरेकता माहेत्य धिक्षिपति। अथ कर्तुस्तमसः उपमानता भविष्यतीत्यत आह। क
र्ता व्यघुपमानं स्यात्। पदीति संभावनायां। तमः कर्तृकारकं सत्तात्तमो निधानं भविष्यतीत्यत आह॥ यो
लिंपतीत्यमुना उपमीयते नेनेत्युपमानं पदित्स्यात्॥ तदान्यः भूतो सावप्रधानः। केनेत्याह। क्रियापदेन
।आख्यातेन यतः कर्तृकर्मकरणाकारकत्रयमपि निष्पाद्य क्रियासैव प्रधानं क्रियाप्रधानमाख्यातं कर्त्रादीनां
क्रियानिवर्तकत्वेनोपसर्जनत्वात्। त्यादिपदमुख्यप्रधानमिति वचनात्। स्वक्रियाख्यातवाच्यात्साध

दि०टि० नैव्यंगतो नान्यमन्यदुपमेयंव्यपेक्षितुं कर्तेर्विनन नप्रकर्तुस्तमसो लेपनक्रिमानिवर्त्य कर्तेनोपमानोपमेयप्रतो
तिक्षिप्तं ।अथ मन्यसे कर्तुस्तमसो मध्युपमानोपमेयतानघटतेमाघटतां लिंपतिस्तूपमानं ।भविष्यतीत्या
॥२२॥ ह। यो लिंपत्समुनात्तुल्यं तमइत्यादिशंसपतिलिंपतीत्यनेन क्रियावाचिना ।उपमाने नतुल्यं तमइत्यपिसंगम
तिवर्णमिति। यतस्तस्याप्येव संशयः लिंपतितमसोः परस्परमुपमानोपमेयभावं कुर्वतः।अंगानीत्यसंबद्धं
असंगतं तावत।उपमानोपमेयभावस्यगतत्वात्। किंच सोपिन्यपरूमनगीयः समः साधारणो गुणो धर्म
:।स्यघपति।अथेंदुरिवतेवक्रमिति कांतिः प्रतीयते। इंदुवक्रयोर्धर्मिणोरुपमानोपमेयभाव।यतयोर्यथा
कांतिः साधारणो धर्मः प्रतीयते तथात इह लिंपतेर्लेपादुपश्लेषणात् तस्यतत्र उभयधर्मिसाधारणामन्यत्र धर्मांतरकां
तिप्रख्यं किंचिलतीयते ततोनोपमानोपमेयभावइत्यर्थः प्रकृतमुपसंहरन्नाभाषते लिंपतीवतमोंगानि इत्या
दौ तुल्यं धर्मव्यपेक्षया भावेनोपमानोपमेयभावस्य तत्प्रादुपश्लेषणार्थी यं लिंपतिधातुर्ध्वांततमः कर्तृकार
कोयस्यासौ ध्वांतकर्तृकः।अंगं कर्मकारको यस्यासावंगकर्मा च पुंसेव मुखेक्षता इतीष्यतो उपमानोपमेय राम०

॥२२॥

इति मवादीत्। अथ केश्चिदुत्प्रेक्षाव्यंजकमाह॥ मन्ये इत्येवमादिभिरुत्प्रेक्षाव्यज्यते शब्दैरिवशब्दोपि तादृश
ः। यादृशा मन्ये इत्येवमादयः शब्दास्तादृशोयमपीति। इवशब्दमुपलभ्योपमाशंका मा कार्षुरित्यर्थः॥ ॥ हेतु
श्च सूक्ष्मलेशश्च वाचामुत्तमभूषणं। हेतुः सूक्ष्मलेशानुद्दिश्य हेतुकारकज्ञापकभेदाद्द्वैविध्यमुपदिशति॥
कारकज्ञापकौ हेतू इति। करोतीति कारको यथा वीजमंकुरस्य जनकं कारको हेतुरुच्यते। समवायासमवा
यनिमित्तभेदात्त्रैधेति केचित्। अपरे पुनरंतरंगबहिरंगबहिरंगभेदात्॥ द्विविधो हेतुः कारक इत्याहुः। ज्ञापय
तीति तं भावि समकालं वा परोक्षं वेति ज्ञापकं यथा परोक्षस्य मसकंपि वृक्ष इत्यलमतिप्रसंगेन। तौ चौभाविमौ
हेतुर्नैकविधो अनेकप्रकारो। यथेत्युदाहरति॥ अयमांदोलितप्रौढचंदनद्रुमपल्लवः। आंदोलिताः कंपिता
अप्रौढाः बालाश्चंदनद्रुमपल्लवा येन स तथाभूतो मलयमारुतो लोकस्य प्रीतिमुत्पादयति। इति मनःप्रीतिज
ननेनैवंविधस्य पवनस्य हेतुत्वमुक्तं। तथानिहत्यावपि अस्यापि जन्ये मन्नहेतुत्वं समस्य हेतोरेतदुक्तं भवति॥ य
थाभावाभावाभवत्येवमभावोपि प्रध्वंसाभावादेव भवत्येव। तु विशेषः कारणात्तु यजन्यो भावो भावः पुनर्नि

मित्तमात्रादितितदुदाहरति। चंदनारएपमाधूपेत्सादिविशेषसमन्वितः पवनः पथिकानामभावापोपस्थितो
द०टि० मरणामजातोइतिपवनोभावोभावमरणस्यहेतुक्तः। निवृत्तावपितस्यममित्रिद्रवमनेनदर्शितं। शेषमजु। वि
॥२३॥ रहज्वरइतिविरहोज्वरत्वेनेष्यते। विरहज्वरेणासंभूतोजातोमनोज्ञेषुचंदनचंद्रिकादिष्वरोचकोऽरुचिर्यस्य
स्तविरहज्वरसंभूतमनोज्ञारोचकस्तस्मिनजनेअभावसाधनामेंएवंभूतोहिमारुतः॥ सुगमं॥ इहखलुक्रि
२३ मपाव्याप्यकर्म्मतत्रत्रिविधं निवर्त्यं विकार्य्यंप्राप्यंचेति। तत्रासतः प्रादुर्भावो निवर्त्यंतदुक्तं। प्रागसत्तः सत्तासं
वंधस्वकारणासमवायोवार्यं निसंकर्मोच्यतो विक्रियतइति विकार्यं। सतांगुणांतराधानं विकारः। यथाहस्तौ
कुरूपादौकुरुइत्युक्तेनप्रादुर्भावोघटस्येव। किंतुअन्नदानेतिगम्यते। तस्मिन्नुभयत्रकर्मणिहेतुत्वंतदपेक्षया
प्राप्यतइतिप्राप्यं। यथाग्रामंगच्छतीत्यत्रग्रामोगमनक्रिययाव्याप्यतो इतिकर्मविषयभूतमपिप्राप्यमेव
। तथाहि। आदित्यंपश्यति हिमवंतंशृणोती तिदर्शनश्रवणाभ्यांआदित्यहिमवंतोव्याप्यमानत्वात्। एवं दस०
प्राप्येकर्मणिप्राप्योवाहुल्येनक्रियापेक्षैवहेतुना। क्रियापेक्षमेवप्राकर्महेतुर्भवति। यथाग्रामंप्राप्यपस ॥२३॥

रगमनक्रियायां आदिसहिमवतो दर्शनप्रवणक्रियमयोरिति। अ— कार्त्स्न्युकर्मसु मध्ये निवर्त्तनीयस्य कर्म
णो हेतुर्दर्शितः। अयमांदोलितप्रौढचंदनद्रुमपल्लवः। उत्पादयति लोकस्य प्रीतिं मलयमारुतः। इत्यनेन न
श्लोकेन। तथा चंदनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान्(पथिका)नाम भावाय पवनोयमुपस्थितः। इत्यनेन
नाशावश्यहेतुरुदाहृतः। शेषयो विकार्यप्राप्ययोर्द्वयोः कर्मणोः। इत्युदाहरणद्वंद्वं ज्ञापकोदाहरणापेक्ष्य
तेः। मया तत्र विकार्यकर्मणो हेतुत्वं तावदुदाहरति। उत्पलवालान्यरण्यानीत्यादिकं कामेन पांथदृष्टिविषं
कृतमिति॥ विकार्यसापेक्षहेतुत्वमुदाहरति। मानयोग्यां करोमीति भवतीमिति प्रियस्थाने निवेशितां
सखीं बाला भ्रूभंगजिह्माक्षी पश्यति स्फुरिताधरा। बाला भ्रूभंगजिह्माक्षी पश्यतीत्येतस्याः दर्शनक्रियायाः स
खीमित्येतत्कर्म हेतुरिति दर्शनक्रियापेक्षैव सखीमित्येतस्य कर्मणो हेतुता। इदानीं ज्ञापकहेतुमुदाहरति।
गतोस्तमर्को भातींदुर्यातिवासाय पक्षिणः। इत्येवमादिकं वाक्यं वार्त्तामेनां प्रचक्षते इति यदुक्रमस्महेनत
दपाकरोति। इतीदमपि साध्येव कालावस्थानिवेदने। कालो रात्रिदिनर्त्तव इति वक्ष्यति। तस्यावस्थादि
नव्यं पगमशान्तिबोधने; ववोधने इति। द्वितीयमुदाहरति। अवध्येरिंदुपादानामसाध्यैश्चंदनांभसां।

रं०टी० देहोस्माभिःसुबोधंतेसखिकामातुरंमन — सख्यामनसःकामासक्तभावावबोधेदेहोस्मरणोहेतवः४।इदानीमु
पसरन्नाहाइतिलक्ष्याःप्रयोगेषुरम्याज्ञापकहेतवः।अभावहेतुश्चव्याप्तेव्यवह्रियंतेउच्यंतेमनोहराः।अभाव
॥२४॥ श्चासौहेतुश्चअभावहेतुः।अभावहेतुरत्नेकरीषः।अभावाख्योहेतुर्भावस्यद्रव्यगुणकर्मलक्षणस्यका
र्यस्यप्रदर्श्यते।सचप्राग्ध्वंसइतरेतरात्यंताभावभेदाच्चतुर्धाभिद्यते।पार्थिवीनामभावायपवनीयमुपस्थि
तइत्येनेनभावोभावस्यकार्यस्यकारणस्यहेतुरुदाहृतः।अयंपुनरभावाभावस्येतिपिष्टपेषणदोषात्तत्रप्रा
गभावहेतुमुदाहरति।अनभ्यासेनविद्यानांजायतेव्यसनंनृणाम्।विदंतिचतुर्वर्गमाभिरितिविद्याआ
न्वीक्षिक्यादयःतासामनभ्यासेनअधीतस्यधर्मकरणप्रयत्नाभावेनअव्यक्ताभावेनवा।तदुक्तं।तत्रस्थितो
मन्त्रोभ्यासःसतुदीर्घकालेनैवमसत्कारसेनवितीर्णोदरभूमिः।तथाधीमत्तांविद्यावृद्धानांअसंसर्गेणावृद्धसं
योगाभावेनअक्षाणांकर्णत्वक्जिह्वाक्षिघ्राणानांअनिग्रहेणानिग्रहाभावेनअजितेंद्रियत्वेनच।तदु
क्तं।कर्णत्वगक्षिजिह्वाघ्राणानांशब्दस्पर्शरूपरसगंधेषुप्रतिपत्तेरिंद्रियजयः।तद्विरुद्धवृत्तिरवशेंद्रिय
इति।तेनानिग्रहेणवाक्षाणांमनःषष्ठानां।यदुक्तं।कामक्रोधलोभमानमायाहर्षमदइतिसागादिंद्रिय रम०
॥२४॥

जयं प्रतिव्यसनं कामजं मृगयादि चतुर्विधं क्रोधवचानुष्का त्रिविधं। एवं सप्तधा मानुषसंप्रनपाज्ञापतौ। तदु
क्तं। अविद्या विनयः पुरुषो व्यसनहेतुः। प्रध्वंसाभावमुदाहरति। गतः कामकथोन्मादः। गतः स्वस्तः कामकथा
प्रारंभः। गलितो यौवनज्वरः। पूर्वाभावो यौवनं तद्गतो ज्वर इति यौवनज्वरः। क्षतः क्षीणो मोहो ज्ञानां च्युता
तृष्णा भवविभवमनोभवभेदात्। त्रिविधा साऽपि नष्टा रं ततः कृतः पुण्याश्रमे पसाश्रमे तपसि मनः स्थितम्
। अनेन कामकथादीनां नाशः पुण्याश्रमे मनः करणस्य हेतुरुक्तः। इतरेतराभावमुदाहरति। वनान्यमूल्य
रत्नापानि मैता निगृहा णीनैता योषितः पीनपयोधराः कुटिलगामिन्यः कामिन्यो न भवंत्येतान्यैघेः। त
थानैते दायादा बांधवाः। किं त्वेते मृगा हरूपषतापसः। ततो नंदति मानसं मूकश्चि सरित्सक सकलसंसार
स्वरूपमिदमध्यधात्। अनेन मनोनंदनस्य कार्यस्येतरेतराभावो हेतुरुक्तः। असंताभावमुदाहरति। अ
संतमसद्विद्यमानमार्याणां विदुषां विवेकिनां अनालोचितचेष्टितं अविमृश्यकारित्वं अतस्तेषां अ
स्मादेव अनालोचितचेष्टितभावादेव विवर्द्धते सततं सर्वसंपदः। अविमृश्यकारित्वाभावः सम्यकृद्धेहे

तुरुक्तः। इदानीमभावाभावस्य हेतुरुदाह्रियते। उद्यानसहकाराणामुद्भिन्नानवमंजरीरेणुः पथिकनारीणां
दं०प्र० सतिलः सलिलांजलिः। उद्यानसहकारामुकुलाभावः स्त्रीमारणहेतुरुक्तः। इहाभावाहेत्वलंकारे वस्तुनो हे
॥२५ तुत्वमुक्तम्। किंभूतस्येत्याह। प्रागभावादिरूपस्य। प्रागभाव आदिर्यस्य तत्प्रागभावादि तद्रूपं यस्य तत्प्राग
भावादिरूपं वस्तु तस्य किंप्रतीत्याह। कार्योत्पादनं प्रति। कथंभूतस्येत्यतिप्रतीत्याह। भावाभावस्वरूपभा
वस्य। भावश्चाभावश्च भावाभावौ तौ स्वभावौ यस्य तद्भावाभावस्वभावं तस्य। इह खलु द्विविधं कार्यं भावस्व
भावमभावरूपं चेति। तस्योभयस्याप्युदाहरणान्युक्तानि ननु प्रागभावादिरूपस्य वस्तुनो हेतुत्वमुक्तमन
भावस्य तत्कथमभावस्य भावाभावश्च भावं कार्यं हेतुत्वमिति चेत्। तन्नातुलस्य नीरूपस्य भावस्याभावा
त्। अभावस्यापि कथं चेत्। तदुक्तम्। भवत्यभावो हि भावधर्मो भावांतरं भावतदन्यतस्ते। प्रतीपत्तेश्च व्यप
देश्यते च वस्तुव्यवस्थागमनेन स्ववाग्मु। घटस्योगतेः प्रागभावोऽपि सएव च भावः। तथा घटप्रध्वंसोऽपि राम०
कपालोत्पादिनी तु पतिभाव घटप्रध्वंसः तथा घटे पटाभावोऽपि पटासद्भाव एवेति। इतरेतराभावोऽपि ॥२५॥

अन्यवस्तुरूपएवाअसंताभावोऽपिनास्ति।प्रकृतिपुरुषस्यद्वितीयशिरस्तृतीयोवाहुरिति।एकशिरःसह
वैरएवेतिप्रागभावादिरूपस्यवस्तुनोहेतुत्वमुक्तमित्सतावर्थः।अथवाप्रागभावादिरूपस्य— तद्वस्तुनोविशे
षत्वं।किंतुप्रागभावादिरूपस्यभावस्यहेतुत्वमिहाथावस्तुन।स्वभावस्यतथाविधोदाहृतं।इदानींदूरकार्या
दीन्यंचकारकान्हेतुदर्शयति।दूरदेशव्यवधानकार्यंयस्यहेतोरसौदूरकार्य्यः।तेनकार्येणसहैवसमका-
लमेवजायतइतितत्सहजः।कार्यादनंतरंपश्चाज्जायतइतिकार्यानंतरजः।अयुक्तंचयुक्तंचयुक्तायुक्तेका
र्येजन्यरूपस्याचयुक्तायुक्तकार्येति।असंख्याअपिकारकज्ञापकाश्चेतिहेतवस्तेस्वयमूह्याः।अतिदूरकार्या
दयःप्रयोगमार्गेषुलक्ष्याःप्रपंचेपुणोदाहृतिमाश्रिताअसंतसुंदराअसंतरमणीमादर्षाननमुखद्युतिव्यपा
श्रयाः।संतोरम्यास्तदुदाहृतयउदाहरणानियथा॥यैलदर्पांगाङ्कयंजेभ्रमनंगास्त्रंयदंगने।हेअंगनेयदर्पां
गाभिधानंअनंगास्त्रंअन्यस्मिन्नन्यतास्त्वमामुक्तं।तेनान्यतोमुक्तेननाप्यहंमनसिक्षतोविद्धइतिदूरकार्य्यः
तत्सहजमुदाहरति।आविर्भवतिनारीणांवयःपर्यस्तशैशवं॥आतीववालभावंवयोयौवनंयेचनितानांप्रक

ठी भवति। पुंसामंगजोन्मादः। पश्चात्सूर्यस्य किरणानुदीर्णं चंद्रमंडलं। किरणान्विकीर्य चंद्रमंडलमुद्गतं। प्रा
गेव हिमांशुरक्षीणामुदीर्णो रागसागरः॥ मृगदृशां रागसागरः। पुनश्चंद्रोदयात्प्रागेव क्षुभित इति रागसागरस्य चंद्रो
दयात्प्रागेव क्षुब्धिलक्षणकार्यस्य प्राक् चंद्रोदयाभिधानो हेतुरुक्त इति कार्यानंतरजः। अयुक्तकार्यमाह। राज्ञां ह
स्तारविंदानि कुड्मलीकुरुते मुकुलतामुत्पादयतीत्ययुक्तकार्यमाह। पाणिपद्मानि भूपानां संकोचयितुमीशते
॥ त्वत्पादनखचंद्राणामर्चिषः कुंदनिर्मलाः॥ पद्मसंकोचकराणां चंद्रकिरणानामयुक्तमेवेति युक्तकार्यकार्यकार
णाद्युक्तकार्यः। प्रकृतमुपसंहरन्नाह। इति हेतुविकल्पस्य दर्शिता गतिरीदृशी हि त्वलंकारप्रपंचस्य हि त्वलंकार
प्रपंचस्यैवं गतिरुक्ता। सूक्ष्मालक्षणमाह॥ इंगिताकारलक्ष्योर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृतः। आकृतेर्ग्रहणा
माकार इंगिताकाराभ्यां लक्ष्यत इति एतदत्र सूक्ष्म इत्यभिधीयते। कस्मात्सूक्ष्म इत्याह। सूक्ष्मस्य भावः सौक्ष्म्यं त
स्मात्सूक्ष्मत्वं चक्षुःप्रभृतिभिर्बाह्येंद्रियै रूपादिवदुपलक्षंमतुमशक्यत्वात्। तत्रेंगितलक्ष्यमुदाहरति। क
दा नौ संगमो भावीत्याकीर्णं वक्तुमक्षमं। अवेक्ष्य कांतमबलालीलापद्मं न्यमीलयत्। कदा कस्यां वेलायां

नोआवयोः संगमः सुरतसंयोगो भावी गम्यादयइति भवतोर्पितं च। इत्येव वक्तुमक्षमं प्रियमवेस्य काचिद्वला
लीलापद्मं न्यमीलयत्। संकोचयमनयत्। वक्तुमक्षमत्वं च सांकीर्णलात्। स्वयं व्याचष्टे। पद्मसंकोचनादेवद
र्शितो निशि संगमः। इत्यादि सुबोधं। आकारसूक्ष्ममुदाहरति। वदर्पितेति दृशालुम्पागीत गोष्क्यामवईता। उ
द्दामरागतरलाच्छापाकापि मुखांबुजे। लामालोकयं ल्यास्तस्याइंगितमन्यथा वृत्तिकां तायाउत्कटरागसा
गरजनितोत्सुक्यान्मुखच्छायाकापि वाचामगोचरावर्द्धते साकारसूक्ष्मोयं इति सूक्ष्मः। इत्यनुद्भिन्नरू
प वाद्भ्युत्सवसंमनोरथः। अनुलंघ्यैव सूक्ष्मत्वमभूदत्र पव ष्थितः। रतिरेवोत्सवस्तत्र मनोरथोअवाक्ति
प्रार्थना उद्भिन्नरूपः अनुद्भिन्नरूपस्तस्यस्य भावः अनुद्भिन्नरूपत्वं त॰स्मात्सूक्ष्मत्वमनुल्लंघ्यैव व्यवस्थितो
वासीदिति। लवमुदाहरति॥ ॥ लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनं॥ लेशो लवपर्यायः उद्देशो लव इति
निर्देशो लेश इति वदतो न दोषः। तस्य पर्यायलालेश इति लक्ष्यनिर्देशः। लेशेन निर्व्याजेन स्तोकेन मनागिति
पावत्। निर्भिन्नं च तद्वस्तु च तस्यरूपं। निगूहनं सं॰वरणमिति लक्षणनिर्देशः॥ अस्य लेशस्योदाहरण

वाक्ये स्वरूपमाविर्भविष्यति। राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः। राजकन्यानुरागहेतुभूतरोमांचेन
दं०टी० रक्षका मा वगच्छन्तु जानीयुर्यथायं राजकन्यानुरक्त इति तस्मात् संवरणमाचरामीत्याह। अज्ञातमहोत्री
ता विलंवनं निसनेन व्याजेन शीतहेतुकं रोममहर्षमाविः कुर्वन् राजकन्याविषयाभिलाषदोषं प्रच्छाद
॥२७॥ यति हितीयमुदाहरणंदर्शयति। आनंदाश्रुप्रवृत्तं मां कथं दृक्ष्यैव कन्यका। अक्षिमि पुष्परजसा वातो
27 द्धूतेन दूषितं। इदं च प्राक्तनोदाहरणव्याख्यानेनैव कृतव्याख्यानमिति न पृथक्व्यतिपाद्यते। इत्थं चमाद्विष्या
नेयमलंकारोतिशोभते। लेखकेचिद्धिदुर्भिदां स्तुतिं वालेश्यातःकृतं॥ सुगमं॥ पुवेषगुणावाना जेत्सादि।
वीर्याल्कर्षस्कृतिर्निदैवास्मिन्जने स्तुतिः कन्यामाभोगानन्तरं जरं निर्विवक्षोरनुभवितुमिच्छोर्भावनिवृत्त
ये ऽभिलाषभंगापोपजायते। चपलो निर्दयेश्वासौजनः किं तेन मे सुखि। किं जनेन। आगः प्रमार्जनापैव
अन्यस्त्रीगमनापराधप्रमार्जनापैव पाटवो येन शिक्षिताः। इत्तत्र दोषाभासो गुणः कोपिदर्शित श्वादुका रामः०
रताः। चाटुं करोतीति चाटुकारस्तस्य भावश्चाटुकारत्वं नाम यो गुणः स दोषवदाभासते न गुपरमार्थदो ॥२७॥

प॥ किंनु गुणा एवा किं कुर्वतेत्याह। मानं सखीजनोदिष्टं कुरु रागादशात्कथा। एवं त्वया प्रियतमविषये मानःक
र्त्तव्य इति यः सखीजनोद्दिष्टः सखीजनेनोद्दिष्टो मानस्तं रागाद्दुत्त विषयस्नेहात् कर्तुमशक्ता या कया चिकाभि
न्या चाटुकारतानामगुणो दर्शितः। इति नस्तत्तिरयं तथा हि। चपल इत्यादि तद्दोषवलामुद्भाव्य चाटुकार
गुणप्रकाशनात्। क्रमलक्षणमाह॥ ॥उद्दिष्टानां पदार्थानामनूद्देशो यथाक्रमम्॥ यथासंख्यमिति प्रोक्तं।
उद्दिष्टानां प्रथमोच्चारितानां पदार्थानामनु पश्चादुद्देशोनूद्देशः तथैव पाठः। यथाक्रमं परिपाटीमनतिक
म्य यथाक्रमं॥ यथासंख्यमिति प्रोक्तं क्रमपर्यायमाह॥ संख्यानं क्रम इत्यपि॥ पर्यायशब्दा वित्युद्देशागन्थेहे
तुः। सूक्ष्मो लवः क्रम इत्युक्तमिह संख्यानमिति न दोषः। उदाहरति॥ ध्रुवं ते चोरिता तन्वि स्मितेक्षणमुखद्यु
तिः। स्नातुमम्भः प्रविष्टया कुमुदोत्पलपंकजैः। स्मितं च ईक्षणे च मुखं च स्मितेक्षणमुखानि। तेषां द्युतिः सा ते
तव संबंधिनां स्मितादीनां ध्रुवं ते तन्वि चोरिता। कैरित्याह। कुमुदोत्पलपंकजैः कुमुदानि श्वेतानि उत्पलानि
नलानि रक्तानि पद्मानि तैरिति न्यथासंख्यमस्ति। तथा हि। कुमुदैः स्मितद्युतिश्चोरिता। नीलोत्पलैरीक्षणद्युतिः।

द०टी० पंकजैर्मुखद्युतिरिति। यथैवोद्देशस्तथा निर्देश इति क्रमः। प्रेयो रसवदूर्जस्विनां लक्षणमाह॥ ॥प्रेयः प्रि
यतराख्यानं प्रियवचनमतिशयपुक्तं प्रेमः। रसवद्रसपेशलं। रसाः शृंगारादयो ऽष्टौ तैः पेशलं रमणीयं यद्रस
॥२८॥ वत्। अतिशयमनेव तु प्रसपुः ऊर्जस्विद्रूढाहंकारं प्रसिद्धो हंकारो। भिमानो ऽस्मिन्निति रूढाहंकारः। अहंकारो ऽभ
र्षपुरुषकार इति वचनात्। अन्यैरपि व्यतिरेकमुखेनोक्रमेतत्। निरामर्षनिरूद्धो गंनि वीर्यमरिनन्दनं। मा
स्मसीमन्तीनी। विज्जनपेसुत्रमीदृशाम्॥ पुरुषोत्कर्षंच। तत्राभिमानो हंकारो लंकारो ऽयमपि प्रेयो रसवदूर्ज
स्वी ति उत्कर्षपुक्तम्। तत्र प्रेय उदाहरति। अद्य या मम गोविन्द जाता त्वयि गृहागते प्रीतिर्या जाता सा पुनस्त्वदाग
मनादेव यदि स्यान्नान्यतः इत्याह। पुक्तं संवद्धमिव विदुरो राजा कृतः संवद्धमेवेत्तादित्याह। नान्यतस्तादृशी ध
तिः। अन्यतः पुरुषान्तरादृशः संतोषो विदुरस्य राज्ञो यतो ना। स्ति अतो भक्तिरेव केवला भक्तिमात्र तेन समाप
ध्यः आराधयितुं शक्यः। सुप्रीतश्च ततो विदुरवचनात् हरिः। भक्त्यानुष्यंति देवता इति वचनात्॥ द्वितीयमु राम०
मुदाहरति॥ सोमः सूर्यो मरुत्पवनः। भूमिः व्योम आकाशं होता यजमानः। अनलो हुताशनः। जलमिति ॥२८॥

रूपाराय तिक्रम्य ० हे देव महादेव त्वा द्रष्टुं केवयं नाम चक्षुषः। इति एवं विभिन्नहृदयाभिरामं यथार्थवस्तुप्रतिपा
दकवचनरचनातः साक्षात्कृते देवे महेश्वरे राज्ञी मद्राजधर्मरताः। प्रीतिप्रकाशनं यत्र तदपि प्रेय इत्यवग
म्यता॥ ॥ रसवदुदाहरति। मत्तोतीति। प्रेत्य मत्त्वा संगंतुं यया सह मे मरणं मतं। सैवावंती वासवदत्ता मया दृष्टा
कथमन्ये वजन्मनीति वाक्यशेषः। प्राक्प्रीतिर्दर्शिता यया प्राप्ते समं संगंतुमित्यनेन। सेवरतिः शृंगारतां गता॥ र
तिः शृंगारोत्पत्तौ स्थाय्यपि भावः। रौद्रात्मतां गतः। रौद्ररसंभावेन परिणतः। शत्रून्वस्यतो भीमस्यैतद्रसवद्वचः
। शृंगाराख्यरसरूपेण परिणमति। रूपस्य वा हुल्यं तद्योगेनातिशयसमवायेन। तदिदं रसवद्वचः। रसदि
ति सामान्याभिधायित्रिः। शृंगारतां गतेति स्फुटतः शृंगाररसवदिति लभ्यते। विगृह्य केशेष्वाकृष्टाः। कृष्णा
द्रौपदी येन दुःशासनेन मम माग्रतः। सोयं दुःशासनः पापो लब्धः। किं जीवति क्षरणामि सारुधिपरां कोष्ठि॥
क्रोधो रौद्ररसस्य स्थाय्यपि भावः। रौद्रात्मतां गतः। रौद्ररसभावेन परिणतः। शत्रून्स्वरूपतो भीमस्यैतद्रसव
द्वचः। पूर्ववद्योज्यम्। अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः। अदत्वा चार्थमर्थिभ्यो भवेयं पार्थि

र०टी० वः कथम्। सागरपर्यंतां महीं अजित्वा राजसूयादिभिर्यागैरनिष्ट्वा पात्रकेभ्यो ऽभिलाषितमर्थमदत्वा
च कथमहं पार्थिवः स्यां मित्युत्साहः प्रकृष्टो ला। उत्साहो वीररसस्योत्पत्तौ स्थायीभावले प्रकृष्टाल्लातिष्ठ
॥२९॥ न्वीररसात्मना वीररसवत्तात्मेति वर्त्तमानः कश्चित्क्षत्रियः। रसवत्तं गिरं तासां अजिह्मासार्थिवामुवी। मि
सादिना समर्थयितुमीश्वरः प्रभुः स्यात्॥ यस्याः कुसुमशय्या ऽपि कोमलांग्या रुजाकरी। कुसुमशयनमपि
यस्या दुःखं उत्पादयति सा देवी हुताशनं वजी चितां कथमधिशेते। इति कारुण्यमुद्रिक्तं। शोकस्थायिनो
भावादाविर्भूतं। अलंकारत्वमास्थितं। आचार्यं विति। तथा परो पिवीभत्सहास्याद्भुतभयानकाः। रसा उदाहृ
यंते इति वाक्यशेषः। जुगुप्तातो भावाद्बीभत्सस्योत्पत्तिं दर्शयति॥ पायं पायं तवारीणां शोणितं पाणिसं
पुटैः। कौणपाः सह नृत्यंति कबंधैः कंत्रभूषणाः॥ त्वदरीणां रुधिरं हस्तांजलिभिः पीत्वा पीत्वा कौणपा वेता
ला। राक्षसाः अंत्राणि भूषणानि आभरणानि येषां ते अंत्रभूषणाः। कबंधैः सह नृत्यंतीति वीभत्सरसेन रसव रम०
द्वचः। हास्यस्थायिनो भावाद्धास्यरसोत्पत्तिं दर्शयति। इदमस्तानमानापाइत्यादि। अभिमानशालिनीस ॥२९॥

खीकाचिन्नमर्णाहसतीतिहास्यरसवद्वचः। त्रोषमञ्जु। विस्मयातस्थायिन्ये भावादुद्भूतरसोस्त्यांचउ
द्भूतरसवद्वचउदाहरति। अंशुकानिक्षौमदुकूलविनयदादीनि तान्येव प्रवालायनि किसलयादनि:तथा
पुष्पहारादिभूषणं·हारनूपुरादिभूषणमेव पुष्पं·तथामंदिराणिधवलितप्रासादकांचनवला:भीप्रासम
तिनिएवशाखा। एषानंदनशाखिनांइंद्रोद्यानतरूणांमिति चित्रमितत। भयातस्थायिनो भावात भयानको
रसलसयते·तेनभयानकेनरसेनरसवत्तामुदाहरति। एवंमघोनोरेवराजस्यकुलिशंवज्रामुधं। किंभू
तं। धारासंनिहितोऽनलोऽग्निर्यस्मितद्धारासंनिहितानलम। यस्यस्मरणादेस्त्रीगर्भपातामकल्पते। य
घस्मात्स्मरणादेवदानवस्त्रीणांगर्भ:पततीति। मन्वेतन्माधुर्यं वैदर्भमार्गविसरेप्रतिपादितमेव:ततःकि
मर्थंपुनरिहोक्तमतइत्साशंक्याह। वाच्यस्याग्राम्यतायोनिर्माधुर्यंदर्शितोरसः। वाच्यस्यवस्तुनोग्राम्यताम
सम्यतासैवयोनिरिवयोनिरुत्पत्तिस्थानंयस्यासौअग्राम्यतायोनिर्माधुर्यंदर्शितोरसः। पूर्ववत्तदुक्तम।
मधुरंरसवद्वाविवस्तुन्यपिरसस्थितिः। येनमाद्यंतिधीमंतोमधुनेवमधुव्रताः। कामंसर्वोऽप्यलंकारोरसम

र्येनिषिंचति।तथाप्यग्राम्यत्वेनैनंभारंवहतिभूयसा।इहस्वय्यरसापत्तौरसवत्त्वाख्यतागिरां।इहपुनःशृंगा
दं०टि० राद्यष्टरसापत्तौवाचांख्यातेतिनपौनरुक्त्यम।ऊर्जस्विनमुदाहरति॥ ॥अपकर्त्ताहमस्मीतिहृदितेमा
॥३०॥ स्मभूद्भयम।अतोभयमोमाभूद्यतोविमुखेषुनिवृत्तेषुभीतेषुनमेबाहुःप्रहर्तुंजातुकदाचिदिच्छति।इदमु
क्तःपरोरिपुर्युद्धेनिरुद्धःकेनाऽपिदर्पशालिनापुंसाततज्ज्ञेयमूर्जस्वीति।एवमादिकमन्यदपिभयाहंका
३० रमेवेति॥पर्यायोक्तलक्षणमाह॥ ॥अर्थमिष्टमनाख्यायसाक्षात्तस्यैवसिद्धये।यत्प्रकारांतराख्यानंव
चनंतस्यपर्यायः।अन्यवस्तुप्रतिपादनद्वारेणोक्तंदिष्यते।उदाहरणेनस्पष्टयति।दशास्येपरभृतः
कोकिलःसहकारस्यमंतरीदशाति।तमहंपरभृतंवारयिष्यामियुवाभ्यांस्वैरंयथेष्टंआस्यतां।अभिल
षितमनुष्ठीयताम।संगमय्यसंयोज्यसखीभूतासहसंकेतसमयस्थानेउद्यानादौतद्दत्तोस्वंतत्सुरतो
त्सवंनिवर्तयितुमिच्छंसाकपापिदूतीसाऽपस्तांततःसंकेतस्थानादिति॥ ॥समाहितलक्षणमाहकिंचि
दारभमाणस्यकार्यंदैववशात्पुनः।तत्साधनसमापत्तिर्यत्तदाहुःसमाहितं।किंचित्कार्यमारभमाणस्य दंम०
॥३०॥

तनस्यदैववलाद्दृष्टवलात्तत्कापकिरणास्मर्थ्यमसाधनंहेतुस्तस्यमासमापत्तिरूपलोकनंतस्समाहि
तमाहुराचार्याः॥ ॥मानमस्यानिराकर्तुंपादयोर्मेपतितुमिच्छतः।तत्रपादौमेनमस्यतइतिद्वितीयमाकर्म
णिभवितव्यंतत्कथंपादयोः।नचापवादिकाकर्मणिषष्ठीति॰नचक्रुधयोगविहितास्याप्ति।लादेशस्यश
तुर्नलोकाव्ययनिष्ठाखलर्थतृणामितिप्रतिषेधात्।अन्योन्यतो।नमस्यतइतिवाक्यार्थेवदवचनमेत
द्विसदोषः।नमस्यतीनमस्कारंकुर्वतइत्सर्थजुष्टवाक्यार्थेपदवचनं।यथाजीवतिप्राणान्धारयतीति
।ततःप्रतिपादनार्थातिरिक्तात्मवसेवषष्ठीत्यनवद्यम्।उपकारायदिष्टेतदुदीर्णघनगर्जितं।मानिनी
मानमपनिनीषोरनुकूलंघनगर्जितं।तदुक्तंकैश्चित्।तान्येतानिशिखंडिताण्डवगुरूण्यम्भोधनानांवरेण्या
नानिदिनानिनूनममतत्संदीनिवदामहे।उद्दामनवनीलनीरजदृशामस्यंतमायोर्जिताभिध्यत्तोस्वय
मेवयेषुविषमामानग्रहग्रंथयः॥ ॥उदात्तलक्षणमाह।आशयस्यविभूतेर्वायन्महत्त्वमनुत्तमम्।उदा
त्तंनामतंप्राहुरलंकारंमनीषिणः।आशयस्यचित्तस्यविभूतेरैश्वर्यस्यवा।अविमानोत्तरंअन्याधिकंयत्

टि०टि० न्महत्वं तदुदात्तं तदुदात्ताभिधानमलंकारमाहुः। गुरोर्दशरथस्य पितुः शासनमात्रामसेतुं उल्लंघितुं राघवो
नश्शाक। कथंभूत इत्याह। पौरावरणाशिरश्छेदकार्यभारेप्यविक्लवः। पदार्थः सुबोध एव॥ रत्नभित्तिषु संक्रां
॥३१॥ तैः प्रतिबिंबशतैर्वृतः। जाहो विदितो लंकेश्वरो दशाननः। अंजनायाः अपत्यमांजनेयः। तेन हनुमता कृच्छ्रा
त्ज्ञातवतः। एतानि प्रतिबिंबानि अनुरागेणेति। पूर्वत्र गुरोः शासनमसेतुमित्यादौ आशयस्य माहात्म्यं मन
31 सो महत्वम्। अत्राभ्युदयगौरवम्। रत्नभित्तिषु संक्रांतैरित्यत्र रावणस्य गौरवं सुव्यंजितं प्रकर्षीकृतमिति
व्यक्तमुदात्तद्वयमप्युदाहृतं॥ ॥अपह्नुतिरिति लक्ष्म निर्देशः। अपह्नवं किंचिदन्यार्थदर्शनमिति
लक्षणनिर्देशः। किंचित्प्रसिद्धवस्तु अपह्नुत्य अपलप्य ततोन्यस्यार्थस्य प्रदर्शनं प्रकाशनं सापह्नुतिर
लंकृया। तामुदाहरति॥ नपंचेषुस्मरस्तस्य सहस्रं पत्रिणामिति। स्मरवाणानां पंचत्वसंख्यामपह्नुत्य सह
स्रसंख्याप्रदर्शनं॥ चंदनमिति। सेयमग्निमयीत्यक्षिः शीतांशु निर्देशः किंचित्प्रसिद्धं वस्तु अपह्नुत्याऽपल राम०
प्य ततोऽन्यार्थस्य प्रदर्शनं किल परान्प्रति॥ शीर्षमभ्युपेत्य स्वेवः चंदनादीनां परेषु सुरिवषु अदृष्टविर ॥३१॥

हकरसंतापेषु आत्मनि पुनः कामिना विरहव्यथाकदर्थिन औत्सुक्यप्रदर्शनात्ः। मस्य चंदनादेः सैषा विष
मापह्नुतिः आत्मविषये चंदनादीनां यच्छिशिरत्वं तस्यापह्नवात्। अमृतस्यंदि किरणाः चंद्रमानाममतो
मतः। अमृतं स्यंदंते अमृतस्यन्दिनः किरणा यस्य स किञ्चन्नाम चंद्रमा इति नोऽस्माकं मतः। अन्य एवा
यमर्थात्मावद्वादन्य एवायमर्थः। अर्थ एवात्मा अर्थस्वभावो वा। किंभूतः। विषं निस्यंदते विषनिस्यंदि
न्यादीधितयो यस्यासौ विषनिस्यंदिदीधितिः। इत्येषा स्वरूपापह्नुतिर्मता। चंद्रस्वरूपममृतस्यंदि किर
णत्वं। तथाहि। बालधेयुदीदीप्तिह्लादनं यो प्रह्लादनं वमः करोति स चंद्रः। अयं पुनर्विषमुत्सृजति। तेना
यं चंद्र एव नेति स्वस्वरूपा[illegible]नो क्रमिति। उपमापह्नुतिरित्यादि सुबोधः॥ ॥श्लिष्टलक्षणमाह। श्लिष्टमि
ष्टमिति लक्ष्यमनूद्य अनेकार्थमिति तस्य लक्षणं विधीयते। अनेकार्थमेकरूपान्वितं पदं वः श्लिष्टं। त
द्भिन्नपदप्रायमभिन्नपदप्रायमिति द्विधा। अभिन्नानि पदानि यस्य तदभिन्नपदप्रायं। अखंडपदमेवव्य एम०
र्थम्। यथा राजा राजेत्येखंडत्वात् सदमखंडमेव रत्नपेषं चंद्रे च वर्तते भिन्नाभिन्नानि वा पदानि प्रायो अखंड ॥३

रं०टि० यस्माद्भिन्नपदप्रायमिति द्विधादिप्रकारं भवति श्लिष्टं। तदुदाहरणैः स्पष्टयति। असावुदयमारूढ। उदय
पर्वताधिरूढः उदितः कांतिमान दीप्तिमान्। रक्तं लोहितं मंडलं बिंबं संस्थानं यस्य। सो रक्तमंडलः। राजा चंद्रः लो
॥३२॥ कहृदयं लोकहृदयं मृदुभिः सुकुमारैः शिशिरैः करैः किरणैर्हरति सुखयति। द्वितीयोऽर्थः। राजा नृपो लोकस्य
चतुर्वर्णाश्रमलक्षणस्य हृदयं हरति। कथंभूतः तदुस्याह। उदयोऽभ्युदयः सप्तांगराज्यावाप्तिः तं उदयमारूढो दी
प्तिमान्। दीप्तिः छविः प्रतापो दीप्तिस्तद्वान्। रक्तमनुरक्तं मंडलममात्यादयः प्रकृतयश्च यस्य सो रक्तमंडल
ः। अनुरक्तप्रकृतिः। मृदुभिः करैरुचितादानैः कन्याषड्भागपण्यभागादिभिरिति भिन्नपदश्लेषः। उदयादिप
१ दैरभिन्नैर्नृपचंद्रमसोरभिधानात्। भिन्नपदश्लेषमुदाहरति। दोषां रात्रिं करोतीति दोषाकारो रजनिकरः
तेन संबद्धः संघटमानः। नक्षत्राणां पंथाः मार्ग आकाशं नक्षत्रपथः तस्मिन्प्रवर्तत इति नक्षत्रपथवर्ती तेन रा
ज्ञा चंद्रमसा सह संबध्यमानो यः प्रदोषो रात्रिसमयो ऽविद्यमाना प्रिया कांता यस्यासौ प्रियः ततो प्रियकां
ता वियुक्तं मानकिंवाधते। तथा दोषाणां कामक्रोधादीनां परस्त्रीद्रव्यहरणादीनामाकरेण अधिकरणेन क्ष रम०
॥३२॥

तादपेत इति क्षत्रं भूपस्तस्य पंथा मार्गः तत्र जीवो वर्णाश्रमपालनं च क्षत्रपथस्तत्र वर्त्तत इति क्षत्रपथवर्त्ती न क्षत्रप
थवर्त्ती । पद्यं ।। क्षत्रपथतनवर्त्ता तद इति अक्षत्रवर्त्ती ति क्रियाप्रतिषेधः । समासस्तु आराद्दूरस्थोस्वादिवद्बहुव्यः । तेन
राजान्वयेनाक्षत्रधर्म्मादपेतेन संबद्धः । प्रकृष्टो दोषो यस्यासौ प्रदोषो जनो मम मनः प्रियमनिष्टं किं न बाधते । इति भि
न्नपदं दोषाणां त्रिपदानामभिन्नतात् । उपमारूपकाक्षेपव्यतिरेकादिगोचराः प्रागेव । दर्शिताः श्लेषाः । श्लेषोपमा श्ले
षरूपकं । श्लेषाक्षेपः । तथा तिप्रसक्तस्य विधिमुखप्रतिषेधफलं नियमः सोऽस्यास्तीति नियमवानः चतुर्थोप्यस्ति ।
नियमउक्तलक्षणः तस्याक्षेपो निषेधः । सरूपं यस्यासौ नियमाक्षेपरूपोक्तिः । अनियमवानित्यर्थः । पंचमोस्ती
ति । न विरोधी अविरोधी अविरोधी यश्च: । तथा विरोधो विप्रतिषेधः । स यस्योप्यस्यास्तीति विरोधी सोप्यास्ति सप्तमः
। तेषामभिन्नक्रियादीनां सप्तानामपि श्लेषाणां निदर्शने षु उदाहरणे ष्वेव रूपमाविर्भविष्यति । तथा भिन्नक्रिय
मुदाहरति ।। वक्राः स्वभावमधुराः संशंसी रागमुल्वणम् ।। ईदृश्यो दूत्यश्च कान्ताभिः प्रेषिताः प्रियानाकर्षंति । दृशां
दूतीनां च प्रियकर्षणामभिन्नक्रियोयं भिन्नक्रियः । शेषमृजु । अविरुद्धक्रियमुदाहरति । मधुरा रागवर्द्धिन्यः । कोम

दं०टि० लाः कोकिलानां गिरो मदकला आकर्ण्यंते। तथाश्लिष्यंते वासितेक्षणाः कामिन्यः। कथंभूता इत्याह। मधुरमाधुर्य
गुणाप्रक्रा रागवर्द्धिन्यः रागवर्द्धनशीलाः कोमलाः पकृषाः। मदेन कलाः अव्यक्ताः। कोकिलानामिवऽगीः श्लक्ष्याः सांताः
॥३३॥ कोकिलागिर इति कोकिलागिरां सितेक्षणानां च विरहे आकर्णनालिंगनक्रियेइत्य विरुद्धक्रियमुदाहरति। एषघ
33 र्मांशुरस्तादिस्थः पराभवति तिरोधत्ते अस्तमुपयाति। किं कुर्वन्। रागं रक्ततामादर्शयन्। वरुणस्येयं वारुणी। पश्चिमादि
क् तया योगस्तेन वर्द्धितो यस्तं। तथांगजो मन्मथस्तु विजृंभते। वारुणी सुरा तस्या योगः पानं तेन दर्शितो यो रागस्त
मादर्शयन्। पराभवविजृंभमाणक्रियये विरुद्धत्वा विरुद्धकर्मा नियमवंतं श्लेषमुदाहरति। निस्त्रिंशत्वं। असा
वेव ष– एवास्य राज्ञो निस्त्रिंशत्वं नान्यत्र। निःस्त्रिंशः क्रूर उच्यते। धनुष्येव वक्रता नान्यत्र। वक्रस्य भावो वक्रता
कुटिलता। शरेष्वेव मार्गणत्वं याचकत्वं व्यवस्थितमिति नियमवान् श्लेषः। नियमाक्षेपोक्तिमुदाहरति। पमाना
मेव नालेषु कंटकस्त्वयि रक्षति। अन्यत्र राज्ये कंटका न संतीति नियमः। तस्याक्षेपः। अथवा दृश्यते रागिमिथु एम०
नालिंगनेष्वपि। कंटको रागः हर्ष इति नियमनिषेधात् नियमाक्षेपरूपोक्तिः श्लेषः। अविरोधिनं श्लेषमुदाहरति। ॥३३॥

महीभृत्सर्वतो राजा वा। भूरयः कटका अधिसंकाय स्य स तथा भूरि बहु कटकं स्कंधावारं यस्यासौ भूरिकटकः। त
था तेजस्वी। तेजो स्यास्तीति आदित्यस्तथा तेजः प्रतापस्तद्वान्। नियतो बत्रयं भावी उदमउडमो भ्युदयः श्वा दक्षः कु
शलः प्रजानां चतुर्वर्णाश्रमाणां लक्षणानां पतिर्नाथः। तथा दक्षो गोर्पाः पिता प्रजापतिर्नाम स्वामी कार्तिकेयः कु
मारः। तथा स्वामि निरैश्वर्ये निपात्यते स्वामी प्रधानमाद्याप्रकृतिः तथा शक्तिर्मुख्यायुधं तद्धारयतीति शक्तिधर
:। तथा प्रभुमंत्रोत्साहलक्षणा शक्तिस्त्रः शक्रमस्ता धारयतीति शक्तिधरः आसन आसन आसीत। इत्यस्य विरोधी। मही
भृद्भूरिकटकादीनां विरोधाभावात्॰ विरोधिनमुदाहरति॰ अच्युतो हरिरपि हर्षं वृषभदीन वैं मुछिनत्तीति वृ
षो छेदी न वृषो छेदी॰ महा॰ वृषं नो छिनत्ति स वृषच्छेदी हिती यो र्थः। च्यवते स्म च्युतः कर्मकलाकर्तरि क्तः न च्युतः वृ
षं धर्मं नो छिनत्तीत्य वृषोच्छेदी तथा राजा चंद्रो प्यविदितः अननुभूतः अशातः क्षमो येनासौ अविदितक्षमः।
जापतिन पाश्य पक्षे पक्षिक्षयं जाति अयं पुनराजा नयः अविदितक्षयः तथा देवो पि विबुधो यः किल दः देवत
उच्यते। अयं पुनर्देवो पि रंद्रा नियमाको निवहूतासो मविते शासौ निर्मितत्वादेकः ▮ तथा प्य विबुधः विगत

टं०टि० बुधाः पंडिता यस्मात् असौ विबुधः न विबुधो विबुधः॥ तथा यः किल शंकरो हरः स भुजंगवान् विटः निरतो
न भवति किंतु विशिष्टरताः विरोधी॥ ॥विशेषोक्तिलक्षणमाह॥ ॥विशेषदर्शनायैव विशेषस्थापना
॥३३॥ यैव सा विशेषोक्तिरिष्यते अलंकारः॥ तामुदाहरति॥ न कठोरं नैव तीक्ष्णमायुधं पुष्पधन्वनः॥ अनेन मन्म
थवाणानां कठोरता तैक्ष्ण्यं च यदायुधगुणद्वयं तस्य वैकल्यमुक्तं। तथापि जितमेव नाजितं मिति असंतायो
33/2 गं व्यवछेदं दर्शयति॥ क्रियया सहैवकारः प्रयुक्तो विशेषदर्शनमेव स्मरस्येति विशेषोक्तिरिति गुणवैकल्यं
दर्शितं न देवकन्यके त्यादिना देवा द्विजाति वैकल्यप्रदर्शितं। तथाप्येषा तपो भंगं विधातुं वेधसोप्यलमिति
विशेषदर्शनात् जाति वैकल्य विशेषोक्तिरियं। न बद्धा भ्रुकुटी त्यादि क्रियावैकल्यं प्रदर्श्य ध्वस्तं च द्विषतां कु
लमि। समेन शौर्याधिक्यस्थापनाद्वैकल्यं क्रियाविशेषोक्तिरिति। न रथा इत्यादिना चतुरंगबलवैकल्यं
प्रदर्श्य स्त्रीणामपांगदृष्ट्यैव जीयते जगत्तां प्रयमितस्मनेन जगत्प्रजयातिशय प्रदर्शनाद्द्रव्य वैकल्यं एम०
विशेषोक्तिरुक्ता॥ एकं चक्रमस्य सैकचक्रो रथस्तावत्तदित्यादि वैकल्यं। न चास्य मनागपि गमनं संभव ॥३३॥

ति।तदुक्तं।।चक्रमेकं न वर्त्तते: न ह्येकचक्रेणारथ: प्रयातीति। यथायं। तासारा— सोपि विकलः कुरुरहितः।
तथा विषमाहयाः सप्त इति रथ्यादीनां वैकल्यं दर्शितं।आक्रामत्येव तेजस्वी तथाप्यर्को जगत्त्रयमिति हे
तु विशेषोक्तिरियं।कुत इत्याह।।तेजस्वीति विशेषणात् तेजस्वित्वादाक्रमतीति तेजो जगत्त्रयाक्रमणे हेतुः न सा
मग्रीयुक्तमन्यैरपि क्रियासिद्धिः सत्वे वसति महतां नोपकरणे।।अयमेव क्रमोन्येषामनुक्तभेदानां भेदाना
मपि कल्प्यते।। ।।तुल्ययोगितालक्षणमाह।। ।।विवक्षितगुणोत्कर्षैर्यत्समीकृत्य कस्यचित्। कीर्त्तनं स्तुतिनिं
दार्थं सा स्मृता तुल्ययोगिता।।विवक्षितो वक्तुमिष्टो गुणानामुत्कर्ष आधिक्यं येषां ते विवक्षितगुणोत्कर्षास्तैः स
ह समीकृत्य समानतामापाद्य यत्कीर्त्तनं कस्यचित् किमर्थमित्याह।स्तुतिनिंदार्थं स्तुत्यर्थं निंदार्थं च स्मृता तु
ल्ययोगिता।तुल्यैः सदृशैर्योग एककार्याभिन्नसंबंधः तुल्यानां वा योगः तुल्ययोगः स एषामस्ति ते तुल्ययोगिनः
तेषां भावस्तुल्ययोगिता।।तामुदाहरति।।यमः कुबेरो वरुणः सहस्राक्षो भवानपि।।बिभ्रत्यनन्यविषयां लो
कपाल इति श्रुतिः।।यमादिभिर्लोकपालनं प्रति विवक्षितगुणोत्कर्षैः राज्ञः कस्यचित् समतामापाद्यं दयति

दं०टि० स्तुत्यर्थी एते भवांश्च लोकपालपंक्ती त्रिलोकपाला इति श्रुतिरभिधानं जाम तद्भवतामपि समानमेव। अवि
द्यमानः पुष्पधन्वव्यतिरेकेणान्यः विशेषोभिधेयो यस्याः सानन्यविषयास्तुतिः तां बिभ्रति दधति स्तुत्यर्थमिति
॥३४॥ ।इदानीं निंदार्थमाह। संगतानि सख्यानि मृगाक्षीणां स्त्रीणां तथा तडितां विद्युतां विलसितानि क्षणाद्धयंपा
माहेन तिष्ठंति। विद्युद्विलसितानि घनैर्मेघैरारब्धानि मृगाक्षीणां सख्यानि च घनं गाढं मारब्धानि स्वयमिति·
34 विद्युद्विलसितेन सह स्त्रीसंगतस्य समतापादनं निंद्यमिति तुल्ययोगिता। विरोधिलक्षणमाह॥ ॥विरुद्धानां
पदार्थानां यत्र संसर्गदर्शनं। विशेषदर्शनमेव स विरोधः स्मृतो यथा। द्विविधो हि विरोधः। भावनां सहानव
स्थानलक्षणः। परस्परपरिहारस्थितिः। सइह यथासंभवं ग्राह्यस्तेन। लिंगितानि विरुद्धास्तेषां पदार्थानां
जातिगुणक्रियाद्रव्याणां संसर्गस्य संयोगसमवायादेर्दर्शनमुपलब्धिः। स विरोधो नामालंकारः। किम
र्थं तत्र विरुद्धानां संसर्गदर्शनमित्याह। विशेषदर्शिमानाये व विशेषो साधारणो धर्मो व्यतिरेकः। तद
र्शनमेवापंप्रमुदाहरति। कूजितं राजहंसानां वर्द्धते मदमंजुलं। क्षीयते च मयूराणां रुजमुत्क्रांतसौष्ठवं एम०
॥३४॥

उत्क्रांतंगतंसौष्ठवंयस्यैसनेनश्वरत्समयेहंसमयूराणांकूजितरूतयोर्वर्द्धनक्षयथोर्विरोधिन्योःसंसर्गो
दर्शितइतिविरोधालंकारः।प्रावृषिभवाःप्रावृषेण्यास्तैर्जलधरैःकृत्तांबरमाकाशंदुर्दिनाधयतेदुर्दिनंक
रोति।सुदिनदुर्दिनमाहारेभ्यश्चेतिक्यः।रागेरापुनराक्रांतंव्याप्तंजामत्तजगतांमनः।दुर्दिनरागयोःपरस्पर
विरुद्धयोःसंसर्गदर्शनाद्विरोधः।तनुमध्यप्रमुश्रोणिरकोषमसितेक्षणां।नततनाभिवपुःस्त्रीणांकनहन्त्य
न्नतस्तनं।अनेनएकत्रैवस्त्रीशरीरेतनुलघुपुलयोरक्रमयोर्नतलोन्नतयोरन्योन्यविरुद्धयोःसंसर्गद
र्शनाद्विरोधः।मृणालप्रभृतीनांसर्गशिशिराणांतापकारणंविरुद्धमितिविरोधश्चउद्यानमारुतोद्धूता
श्चूतचंपकरेणवः।।पुष्पाणीतितस्यावयवाद्रसामृतस्यारणाः।फलेलगितिपुष्पाद्धेतिवक्तव्यलुकतेननूतचं
पकरेणावइतिगम्यते।तेषांपांथानांलोचनंउद्धृतास्रंकुर्वंति।उदस्रयंति।अस्यशांतोदर्शनपथापर्तिनः
अपिपंथानस्तान्निमोचयंति।अस्यशांतोअश्रुविमोचनकारितंविरोधः।कृष्णार्जुनानुरक्तापिदृष्टिःकर्णा
वलंबिनी।।यातिविश्वसमीपत्वंकस्यतेकलभाषिणि।दृश्यते,नैयेतिदृष्टिःकर्णसाधनःक्रिन।दृकृश्या—

अधिष्ठानं चक्षुः कृष्णकृष्णवर्णार्जुनाख्येनाताभ्यां कृष्णा च। सार्जुनाअनुरक्ता च यथा कृष्णार्जुनानुरक्तेति विशे
कं०टी० षणसमासः। करेण्विव यां अवलंबत इति कर्णावलंबिनी कर्णांतविश्रांता सा। कस्येत्याह। कलभाषिणि मधुरा
भिधायिनि विश्वसनीयत्वं याति विरोधः पुनः कृष्णो वासुदेवः अर्जुनः पार्थः तयोरनुरक्ताऽपि। कर्णराधेयं यतो वि
॥३५॥ पक्षभूतमालंबते। तदा न विश्वासयोग्या स्यादिति। इदानीं प्रकृतमुपसंहरन्नाह। इत्यनेकप्रकारोयमलंकारो वि
रोधः प्रतीयते विस्तार्यमे। ततो ये पकीर्तिनका स्यमतलं। शेषमृजु। अप्रस्तुतस्तोत्रमलंकारं निर्दिशति। अप्रस्तु
35 तप्रशंसास्यादप्रक्रांतेषु या स्तुतिः अप्रस्तुतस्तोत्रमिति लक्ष निर्देशः। अप्रस्तुतेऽपि या स्तुतिरिति लक्षणनि
र्देशः। तदुदाहरति॥ सुखं जीवंति हरिणा वनेष्वपरसेविनः। अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः। स्वयं वि
वृणोति। सेयमप्रस्तुतैर्वा प्रक्रांतैर्वा अत्र मृगाणां हरिणप्रभृतीनां वृत्तिः प्राणयात्रा प्रशस्यते केनाऽपि सेवानिवृ
त्तेन सर्वो हि स्वमनस्थितताभिमानशालिनेति॥ ॥व्याजस्तुतिलक्षणमाह॥ यदि निंदन्निव स्तौति व्याजस्तु
तिरसौ मता। निंदां कुर्वन्निव। ननु परमार्थेन न निंदति यदि किंचित्कमपि स्तौति तदा सा निंदास्तुतिरिति स्तु राम०
॥३५॥

ताआचार्यैः।दोषवदाभासंतेदोषाभासनेनपरमार्थेनदोषाःकिंतुगुणाएवअस्यांव्याजस्तुतौसंनिधिंलभंते
तामुदाहरति।तापसेना।ऽपिरामेराजतेमेभूतधारिणी।पृथ्वी।लपाराज्ञापिसतासैवजिताना।ऽधिकेतिमा
भून्मदोगर्वस्तव।पुंसःपुराणाद्धाद्दाच्छिद्यलपापरिभुज्यते हेराजन।इक्ष्वाकुवंशस्यकिमिदंतवयुज्यते।ह्य
ह्यास्यसोऽपहृत्यस्मायुपभोगोदोषवदाभासते।नवतथापुंसः।पुराणाद्धरेराच्छिद्यश्रीपरिग्रहःशौर्यातिश्र
पव्यावर्णनमिति।निंदास्तुतिः।भुजगोविष्टस्यभोगोमुहुरासेवाभुजंगभोगस्त।स्मिन्संसक्तामेदिनीत
वकलत्रंपत्नीततःअहंकारःपरांकोटिमारोहत्युकथंतवेतिदोषवदाभासते॰नचतथा।भुजंगोनागराजःशेषः
तस्यभोगःसहस्रसंख्याःभुजंगभोगाःतेषुसंयुक्तातदुपरिस्थितापामेदिनीसातवकलत्रमिति।निंदास्तुतिः।इ
तिश्लेषानुविद्धानांश्लेषालंकारसंगिनांउभयार्थवाचिनामप्येषामेवंप्रकाराणामपर्यंतोऽत्रव्याजस्तुतावलंकारे
विस्तरःप्रपंचः॥ ॥निदर्शनालंकारलक्षणमाह।अर्थांतरप्रवृत्तेनअपर्यंतोऽत्रव्याजस्तुतावलंकारेविस्त
रःप्रपंचः॥ ॥निदर्शनालंकारलक्षणमाह।अर्थांतरप्रवृत्तेनकविनाकिंचित्किमपितत्सदृशं।अभिधित्सिता

पान्निरानुरूपं फलं सत्शोभनमन्यद्वा विपरीतं वा यदि प्रदर्श्यते तदा निदर्शनामिमलंकारः स्यात् । तदुदाहरति
दं०टि० ।उदयन्नेव सविता पद्मेष्वर्पयति श्रियः ।सविता आदित्यः उदयन्नेव पद्मे श्रियमर्पयति ।एतानि अभ्युदयमभिल
षंतीति । किंकुर्वन्निसाह । विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् । ऋद्धीनां संपदां फलं विभावयितुम्प्रमथापपि
॥३६॥ तुं जनेभ्य इति वाक्यशेषः । कथंभूतमृद्धीनां फलं विभाजयितुमिति प्रमसेत्या सुहृदनुग्रहं सुहृतारो मित्राणाम
36 नुगृह्यंते । तेनेति सुहृदनुग्रहं तस्य । तदुक्तं अन्यैरपि । लक्ष्म्या लक्ष्मीवतां लोके विकाशिन्याऽपि किं तया । वंधुभिश्च
सुहृद्यते । तेनेति सुहृद्भिर्न विलब्धा पाविभुज्यते । इति तदुदाहृतम् । असेदुदाहरति । पाति चंद्रांशुभिः स्पष्टा ध्वांत
राजी पराजिता ॥ चंद्रकिरणैः स्पष्टा अंधकारततिः पराभवं याति । किंकुर्वतीसाह । सद्यो राजविरुद्धानां द्योतयंती
दुरंततां । राजा चंद्रो नृपश्चोच्यते । नान्येषामपि । राजापथ्यकारिणामेवं विधएव विपाकः । कटुरिति निदर्शना
। सहोक्तिलक्षणमाह । सहोक्तिः सहभावस्य कथनं गुणकर्मणाम् । गुणानां रूपादयो द्रव्याश्रया निर्गुणाः । क
र्माण्युत्क्षेपणादीनि शास्त्रे परिभाषितानि वैशेषिकैः । लौकिकास्तु गुणाः कविशोभादयः कर्माणि चक्रिमाः एम०
॥३६॥

ःतेषामिहमयपासंभवंग्रहणाम।गुणानांकर्मणांसहभावस्यप्रकथनंतत्सहोक्तिरित्युच्यते॥परिवृत्तेर्लक्षणं
करोति॥अर्थानांयोविनिमयःपरिवृत्तिस्तुसा।अर्थानांद्रव्यादीनांयोविनिमयःप्रतिपादनंपरिवृत्तिस्तु
सा॥यथेमुदाहरणे।तत्सहोक्तिमुदाहरति।सहदीर्घाममश्वासैरिमाःसंप्रतिरात्रयः।इमारात्रयोदीर्घा
मदीयैःश्वासैःसहैतत्ररात्रीणांश्वासानांचदैर्घ्यस्यसहभावाभिधानात्सहोक्तिः।एवंसर्वत्रयोज्यमुत्तर
त्राऽपि।नकेवलंममश्वासैःसहइमारात्रयोदीर्घाःतथा।पांडुराश्चममैवांगैःसहताश्चंद्रभूषणाः।चंद्रा
भरणानांनिशानाममांगानांचपांडुरत्वस्यसहाभिधानात्सहोक्तिः।वर्द्धतेसहपांथानांमूर्छयाचूतमंजरी।
पथिकानांमूर्छयासहवर्द्धते।यथायथासहकारमंजरीवसंतसमयेवर्द्धते।तथापथिकानांमूर्छापावतः
क्रियायाःसहभावः॥कोकिलालापसुभगाःसुगंधिवनवायवः।यांतिसार्द्धंजनानंदैर्वृद्धिंसुरभिवासराः
।कोकिलालापैःसुभगाःसुगंधयोवनवायवोयेषुते।सुरभिवासराएववसंतसमयदिवसाजनानंदैःसहवृद्धिं
यांति।अनेनवसंतदिवसानांजनानंदानांचसहभावोभिहितइति।सहोक्तिमुपसंहरति।इत्युदाहृत

पोद्धृत्तास्महोक्तिस्तत्रकाश्चनक्षिप्यते परिहृतेष्वकिंचिद्रूपनिरूपणाम॥ शस्त्रप्रहारं ददता भुजेन तव विद्वि
र० टि० षाम। चिरार्जितं यशस्तेषां हृतं कुमुदपांडुरम॥ तव भुजेन शस्त्रप्रहारं ददता यशो हृतमिति शस्त्रप्रहा
॥३७॥ रपदस्यैर्लीनादानाभ्यां परिवर्तनं कृतमिति परिहृतिः। आशिषोलंकारस्य लक्षणं करोति। आशीर्ना
मा भिलषिते वस्तुनि पदाशंसनं सा आशीरलंकारः। मथेमुदाहरति॥ पातु वः परमं ज्योतिरवाङ्मनसगो
37 चरम। पातु रक्षतु वो युष्मान् परमं ज्योतिरालोको ज्ञानं अवाङ्मनसगोचरं वचसो मनसश्चाविषयो भ
वति। तथानन्वयसंदेहोपमारूपकोत्प्रेक्षावयवानामलंकाराणामत्र लक्षणानभिधानाभूतममलंकारल
क्षणं। तथाहि। यत्र तेनैव तस्यास्यादुपमानोपमेयता। असादृश्यं विवक्षितं तमित्याहुरनन्वयम। तस्यो
दाहरणं। तांबूलरागबहुलं स्फुरद्दशनदीधिति। इंदीवराभनयनं तवेव वदनं तव। इत्यनन्वयः। उपमाने
न पंचभेदं च वदतः पुनः ससंदेहवद्वचः स्फुटसंसंदेहं विदुर्यथा। तस्योदाहरणं। किमयं शशी न स दिवा
विराजते। कुसुमायुधो न धनुरस्य कौसुमम। इति विस्मयादिह यशो तोमयेतिस्मयं वीक्षते ना लभते ऽ रामु०
॥३७॥

निश्चयं इति संदेहः इति। एतावनन्वयससंदेहावलंकारौ अस्माभिर्न पृथगुदाहृतौ। तावस्माभिरुपमास्वेव
दर्शितौ। तथाहि। अनन्वयो, साधारणोपमा यदुक्तं। चंद्रारविंदयोः कक्षामतिक्रम्य मुखं तव। आत्मनैवा
भवत्तुल्यमित्यसाधारणोपमा। ससंदेहोपि संदेहोपमा। यदुक्तं किं पद्ममंतर्भ्रांतालि किं ते लोलेक्षणं मुखं
म। मम दोलायते चित्तमितीयं संशयोपमा॥ संशयससंदेहयोः पर्यायत्वादभेदः। उपमारूपकलक्षणं
यथा। उपमानेन तद्भावमुपमेयस्य साधनम्। पावदि सुपमानेन तदुपमारूपकं यथा। तस्योदाहरणं। स
मग्नगगनाभोगमानदंडो रथांगिनः। पादो जयति सिद्धस्त्रीमुखेंदुनवदर्पणः। एतदप्युपमानरूपकं अस्मा
होक्तमस्माभी रूपकेष्वेव दर्शितम्। तथाहि। इष्टसाधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः उपमाव्यतिरेकाख्यं
रूपकं द्वितयं यथा। अयमालोहितच्छायो मदेन मुखचंद्रमाः। सन्नद्धोदयरागस्य चंद्रस्य प्रतिगर्जति। इ
तीदं रूपकेष्वेव दर्शितमिति न पृथगुदिश्यते। अस्माभिर्नोक्तमुत्प्रेक्षावयवलक्षणं यथा। श्लिष्टस्यार्थेन संयु
क्तः किंचिदुत्प्रेक्षयान्वितः। रूपकार्थेन पुनरुत्प्रेक्षावयवो यथा। तुल्योदयावसानत्वाद्गतेस्त्वं प्रति भास्वति।

द०टी०

वासापवासरूकांतोविशांतिचतमोगृहम्। इत्युत्प्रेक्षावयवोत्प्रेक्षाभेद एवामंचोत्प्रेक्षाप्रपंचदर्शनोत्सेनैवो
दाहृत इति नपृथगस्माभिरुदिश्यते॥ इदानींसंकीर्णलक्षणंकरोति। नानालंकारसंसृष्टिः संसृष्टिर्निगद्यते। सं
कीर्णमितिलक्ष्यनिर्देशः। नानालंकारसंसृष्टिरितितस्यलक्षणं। उद्देशेसंकीर्णमित्यभिधानिर्देशः। संसृष्टिरित्य
॥३८॥ भिदधतीनदोषः। संकीर्णसंसृष्ट्योरेकार्थत्वात्। अंगांगिभावावस्थानंसर्वेषांसमकक्षता। इत्यलंकारसंसृष्टेर्लक्ष
38 णीयाद्वयीगतिः। तस्मालंकारसंसृष्टेद्वौभेदौभवतः। तथाहि। अंगांगिभावेनावस्थानंएकस्यांगभावोऽपरस्यां
गिभावोगुणप्रधानभावस्तेनाऽवस्थानं। तथासर्वेषामलंकाराणांसमकक्षतानैकस्यापिगुणप्रधानभावःतेना
वस्थानं। तथासर्वेषामलंकाराणांसमकक्षतानैकस्याऽपिगुणप्रधानभावः। किंतुसर्वेषामेकदेशोपात्तानाम
लंकाराणांस्वतंत्रता। ताउदाहरति। आक्षिपत्सरविंदानिमुग्धेतवमुखश्रियम्॥ इत्युपमा। कोशदंडसमग्राणां
किमेषामस्तिदुष्करम्॥ कोशोद्रव्यंऽदंडश्चतुरंगबलेनसमग्राणांपरिपूर्णानां। किमेषामस्तिदुष्करं। अस्येषाम एम०
रविंदानांचकोशोमकरंदस्पंदगर्भः। दंडोनालमितिश्लेषः॥ कोशदंडसमग्राणांकिमेषामस्तिदुष्करं। ननु ॥३८॥

खलर्थषष्ठी प्रतिषिद्धा ततः कर्त्तरि तृतीयायां किमेभिईष्करमिति भवितव्यमिति चेन्न। नकर्त्तृकाविवक्षायां
संबंधे षष्ठी सदोषः। पूर्वोक्तार्थसमर्थनपरस्यादर्थांतरन्यासोपमि। पमितिसंसृष्टिः। श्लेषः सर्वासु पुष्णाति
प्रायो वक्रोक्तिषु श्रियम्। प्रायो बाहुल्येन श्लेषालंकारः सर्वासु उपमादिषु वक्रोक्तिमध्ये श्रियं शोभां पुष्णा
ति। तदेवं सर्वं वाङ्मयं द्विधाभिधानं भवति। स्वभावोक्तिर्वक्रोक्तिश्चेति। तथैवोदाहृतं॥ ॥भाविकालंकारल
क्षणनिरूपणार्थमाह॥ ॥भाविकत्वमिति प्राहुः प्रबंधविषयं गुणम्। भावे भावो भावादागतो वा भाविकस्त
स्य भावो भाविकत्वं। तत्किमित्याह। प्रबंधविषयं गुणम्। प्रबंधो विषयो गोचरं यस्य। असौ प्रबंधविषयो यो गु
णः कवेस्तद्भाविकत्वमित्युच्यते। केत्याह। काव्येषु काव्यादिषु। क्वात इत्याह। आसिद्धिमाप्तितः। आदित आर
भ्य समाप्तिपर्यंतं कवेर्योऽभिप्रायस्तद्भाविकत्वं सभाविकालंकार उच्यते। एतदेवोक्तं भम्महेनापि। भाविकत्वं
पुनः प्राहुः प्रबंधविषयो गुणः। प्रत्यक्षा इव दृश्यंते तत्रार्था भूतभाविनः। तथा न केवलं प्रबंधविषयं गुणमेव
भाविकत्वमाहुः। किंतु। परस्परोपकारित्वं सर्वेषां वस्तुपर्वणां। यत्तद्भाविकत्वमाहुराचार्याः। कविनाऽभिधि।

स्तितं कथावस्तु वस्तुशब्देनोच्यते। तस्य वस्तुनः पर्वाणि कथावयवास्तेषामन्योन्योपकारकत्वं भाविकत्वं·
दं०डि० स भाविकातितत्वं· तथा विशेषणानां व्यर्थानां विरुद्धार्थानां विगतार्थानां वा ऽक्रियाकरणमप्रयोगः भाविकत्वं·
॥३९॥ तथा स्थानवर्णनं स्थाने प्रस्तावे एव वर्णनं न पुनरकस्मादेव कस्य चिद्वस्तुवदपस्य स्तवः। एतच्च भाविकत्वं· तथा·व्य
क्तिः। अर्थव्यक्तिरुक्तिक्रमवलादुच्यते· अनपेत्युक्तिस्तस्याः क्रमः परिपाटी तस्य वले अभिधानावृत्तिस्तस्याघु।
39 क्तिक्रमवलात् गंभीरस्याऽपि कथावस्तुनो याव्यक्तिः स्पष्टीकरणं। एतत्सर्वं भावायत्तं कवेरभिप्रायायत्तमि
ति हेतोस्तद्भाविकं विदुः। तथा अल्पमिदमुक्तम्। किंच। यथागमांतरे काव्यलक्षणादलंकारशास्त्रादन्यआग
म आगमांतरं भरतशास्त्रं तस्मिन्नागमांतरे यच्च वृत्तसंगसंध्यंगलक्षणादि व्यावर्णितं भरतमुनिना तथेहका
व्ये ऽस्माकमिष्टमलंकारत्वेन। उपसंहरन्नाह।। पंथाः स एष विवृतः परिमाणवृत्त्या संक्षिप्य विस्तरमनंतम
लंक्रियाणाम्।। पंथा मार्गो वैदर्भगौडीयभेदभिन्नः स एव चिरंतनैराचार्यैरुक्तोऽस्माभिर्विवृतः श्लेषप्रसा राम०
दादिरूपेण। तथा स एव पंथाः उपमादीनां भाविकपर्यंतानां अलंक्रियाणां विवृतः कथं विवृत इत्याह। ॥३९॥

संक्षिप्य विस्तरं व्य। सं अनंतं अपर्यंतं प्रतिक विस्थितं। संहृत्य। तदुक्तं। इक्षुक्षीरगुडादीनां माधुर्यस्यांतरं म
दं०टी० हत्। तथापि न तदाख्यातुं सरस्वत्याऽपिशक्यते। कमा विहृत इत्याह। परिणामवृत्त्या परिणाममभिपत्ता।। तथा
हि।। वैदर्भमार्गस्य प्राणा अलंकाराश्च उपमादयो नापरे। ये पुनः प्रतिपुरुषाभिप्रायभिन्ना विशेषा वाचां वि
।।५०।। षयोगोचरं अतीत्यातिक्रम्य स्थिता अवाग्गोचरास्तान् विवरीतुं मन्यास एवालं समर्थः। न पुनराचार्योपदेशः
।तदुक्तं।। बहुशो बहुशो पापं कालेन बहुना स्वयं। गच्छत्सम्यस्य तत्तस्य गुणादोषाः प्रकाशताम।। ।।इतिदंडि
कृतालंकारस्य टीकायां द्वितीयः परिच्छेदः ।।

एम०
।।५०।।

(५०)

पत्रे ४०

श्लो २००

नं-३८३५

दं०टी० ॥श्रीगणेशायनमः॥ विद्वत्श्रीधरंनत्वासत्सवाक्यंजगत्सतिम् दंडिनोऽलंकृतेष्टीकांकुरुतेवादिघंघलः
वैदर्भगौडीयमार्गविभावनायपरिच्छेदेमाधुर्यमाविख्यातुनाचार्येणतद्रूपातिद्विपदाशक्तिःसानुप्रा
॥१॥ सारस्मावहेसनुप्रासप्रसंगेनवर्णावृत्तिरनुप्रासलक्षणाधिकारेप्रसंगतोयमकमप्युद्दिष्टंतत्तुनैकांतमधुर
मतः पश्चाद्विधास्यतइतिनप्रपंचितम्। तदिदानीमसाधारणश्लेषादिसाधारणास्वभावाख्याद्यलंकार
जातमुपवर्ण्यविस्तरप्राप्तमव्यपेतेत्यादिनायमकलक्षणंनिर्दिशति। वर्णानामक्षराणांसंहतेःसंघातस्य
विशेषणापदपदार्थ्योऽनुलोमप्रतिलोमादिनायाश्चावृत्तिरावर्त्तनंपुनःपुनरुक्तिः। किंभूताऽव्यपेतःपद
पादादिनाऽव्यवहितःव्यपेतोव्यवहितइतिलक्षणमुक्तम्। इदानींतच्चेत्यादिनाऽस्यविषयंनिरूपयति।
पादानांवृत्तस्यजातेर्वाआदिश्चमध्यश्चअंतश्चगोचरोविषयप्रदेशस्थानंयस्यतत्पादानामादिमध्यांत
गोचरं। इदानींतत्प्रभेदानाह एकश्चद्वौचत्रयश्चचत्वारश्चतेचतेपादाश्चतेषुमानिमकानितेषांविक यम०
ल्पनमाभेदाःकतिभवंतीत्याह। आदिमध्यांतमध्यांतमध्याद्याद्यंतसर्वतः। आदिश्चमध्यश्चअंतश्चमध्या ॥१॥

तौ च मध्यादी च आद्यंतौ च सर्वत्रश्च सर्वेषु पादेषु सर्वेषु त्रिष्वपि स्थानेष्विति। तथाहि। तत्रादिपादादियम
कमेकमन्यत्र। पादमध्यमपरं। पदांतयोरन्यत्र। मध्याद्योरन्यत्र। आद्यंतयोश्चापरम्। पदस्यादौ मध्ये अं
ते चान्यत्र। एवमेकादिभिः त्रिचतुःपादानां आदिमध्यांतभेदैर्मध्यांतमध्याद्याद्यंतसर्वत्रश्च पादपादव्यवहि
तोभयसंकीर्णभेदतो संतां बहवस्तेषां यमकानां भेदाः। सौकर्यायो निरूपयितुमशक्यास्तं येषां तेषु भेदयोर्नमः
। तेषु यमकेषु केचित्सुखेन क्रियंत इति सुकराः। दुःखेन क्रियंत इति दुष्कराः। तेष्वयमयेषु मध्येमदर्श्यते केव
न। तथाहि। दिङ्मात्रदर्शनार्थं वक्ष्यते। सुकराव्यवहितामानेनेत्यादयः। दुःकराव्यवहितामधुरेणेत्येवमा
दयो व्यपेताव्यवहिताः। नयानयेत्येवमादयः। संकीर्णाधराधरेत्यादयः। दुष्कराव्यवहिताव्यवहितोभय
संकीर्णाश्च। तत्राऽव्यवहितं प्रथमपादादियमकमाह मानेनेत्यादि। मानेन गर्वेणाननेनैवंविधः प्रणामः
संबंधः सखि माभूत्। मानममुमेवंविधं प्रियतमविषयेमाकार्षीरिति काचित्कांतं प्रतिकुपितामानिनी
सख्येव मनुनीयते। हे सखि लंखंडिता विप्रलब्धा तस्य प्रियस्य कंठमाश्लिष्य आलिंगय तमेव प्रियं सत्त्वं संसल

दं०टि०

॥१॥

तालेखगामनमरस्य कामिनीयहृदि रहो दुःसह इत्यर्थः। यश्चागमनमप्रतिषेध्यं यस्याश्च कोकिलाया इवक
लमालपितं प्राणाः कलालपितं प्राणिनी। या च पुष्पापरिमलनिचया॥ विरचितानुनु॥ ॥यमकलक्षणमभि
धायेदानीं स्वरस्थानवर्णानां यमकमाह॥ ॥यः स्वरस्थानवर्णानां नियमो दुष्करेष्वसौ। इष्टश्चतुःप्रभृत्येषदर्श
नो सुकरः परः॥ स्वरा अकारादयः अकारपर्यंता ह्रस्वदीर्घप्लुतोदात्तसानुनासिकनिरनुनासिकभेदभिन्नाः
स्थानानुरःकंठःशिरस्तालुजिह्वादंतौष्ठनासिकाभिधानानि। वर्णाः ककारादयो हकारपर्यंतास्तमलिंशश
ता। यद्यपि स्वरा अपि वर्णास्तथापि यथकशब्दो पादानादिह वर्णशब्दो गोबलीवर्दवत्ककारादिषु वर्त्तते। न
पुनरकारादिष्विति। स्वराश्च स्थानानि च वर्णाश्चेति द्वंद्वः। तेषां नियमोऽवधारणं दुष्करेषु पदेष्वोऽभिमतः स
एव चतुःप्रभृति चतुरवधि। प्रभृतिशब्दोऽयं मर्यादायां वर्त्तते। तेन आचतुर्भ्यः स्वरस्थानवर्णेभ्यः प्रदर्श्यते।
उदाहृियतेऽस्माभिः। अतः परे पंच षडादि सुकरा न ते न प्रदर्श्यंत इत्यर्थः॥ ॥तत्र स्वरनियमे चतुःस्वरय

हा॥ आम्नायानां ऋग्यजुःसामाऽथर्ववेदानां सत्याकाऽक्ऽउपनिषजं आह। न ब्रवीति। किं तदित्याह। इतीदै
दं०टी० वीः पीडाः। आत्युदकमहद्व्याधिदुर्भिक्षमकरव्यालशलभमूषकरक्तांसितथ्यागीतिर्गमनानि। वेदांतशास्त्र
। भीतिर्भयानि। पशुमृगपक्षिस्थावरसरीसृपस्थावरनरराजतस्करादिभ्यः। उत्पन्ना भीतिः सर्वाणि। एकां
॥२३॥ तिकां तितिक्षियातिशयमयुक्त्या। यद्वा गीतीः श्रुतीः। इतीः उपसर्गनिवहः। भीतिर्विषहदुःखानि सांसारिकानि
23 । भीतिर्भयानि संसारहेतुत्वादाहुः। तथा भोगो विषयानुभवस्त्रीसुखादिः। रोगो व्याधिरित्याह। मोदो हर्षः। संमो
हो मदिराजनितो विकार इत्याह। इच्छेध्येयेध्यातव्ये द्वेषो समे द्वेमे वा शब्द एवकारार्थे। अवधारणार्थे वर्ततेऽत
इच्छे एव ध्येये रज्ये इति च मामंतरस्यापमर्थः। इच्छे द्वेगीतीः भीतिरितिच्छेद इच्छे ध्येये धारणीये अपरे द्वे साज्ये भी
तीरीती॥ ॥ त्रिस्वरमुदाहरति॥ स्तितिर्मही तस्या विजितिर्विजयः स्थितिर्मर्यादा तस्या विहितिर्विधानं स्ति
ति विजितिश्च स्थितिविहितिश्चेति द्वंद्वः। तएव व्रतामवश्यकर्तव्यत्वादपरित्याज्यत्वाच्च। तत्र रतिरस्यायेषांते राम०
स्तितिविजितिस्थितिविहितिव्रतरतयः। पराप्रकृष्टा गतिश्चेष्टा येषां ते परागतयः। कुरवो दुर्मोधनादयः ॥२३॥

स्वमरिकुलं निजं रिपुकुलं उरु महत् रुरुधुः । वीवाधामासप्रसारः । जवेनावृतवंतस्तथा । गुरुत्वयाभवत्से वंदुधुवुः
कंपितवन्तः । मृधि संग्रामे ॥ ॥ द्विःस्वरमुदाहरति ॥ श्रीश्चदीप्तिश्च ह्रीश्च कीर्तिश्च नीतिश्च गीश्च प्रीतिश्चेति
द्वंद्वः । पदार्थः सुप्रसिद्धा एव । यैतेङमेहेहे हेइति वीप्सायां द्विर्वचनम् । तितवइमे हेहे श्रीकीर्तिइत्यादि । केन
प्रतिषेधेन विद्यते । देवेशो देवानामीशो विष्णुस्तस्मिन्निति । तवैवेकस्यनान्यस्यन्नपतेस्तइत्यर्थः । एकस्वर
स्योदाहरणं सर्वतो भद्रं तत्तु व्याख्यातमेव । तदेवं स्वरनियममुक्त्वा स्थाननियममुदाहरति ॥ ॥ हे अंगने
गगने रिच्छिद्रीयिताम् । सकृदेकवारम् । नयनमोदानंदं प्रीतिं जनमतितिपत्ततनयनानंदजननमात
स्मिन् । अविद्यमानायस्मिंस्तदघनं तस्मिन् । कश्चित्सरस्समयेनिर्मलं नभस्थलं विलोकयितुं निदेशिकां
तांप्रेरयति । अकुहविसर्जनीयाः कंठ्याः । इचुयशास्तालव्याः । एऐ कंठतालव्यौ । ऋटुरषा मूर्द्धन्याः ।
ल■तुलसादंत्याः इतिचतुःस्थानमेतदतिरिक्तस्थानवर्णाभावात् ॥ ॥ त्रिस्थानमुदाहरति ॥ हे घन
स्तनि तवाननं कं कामिनं न हंति न खेदयति । किंविशिष्टं अलिरिव नीलालकलताधम्मिल्लवद्य

दं॰टि॰ रीयस्मिंस्तद्दविनीलालकलताम्म। नलिनं कमलं तच्छायेव प्रभा यस्य हे श्यामतन्नलिनच्छाममनमन्म। शशिकां
ति। शशिनश्चंद्रमस इव कांतिर्यस्यितत्त्॥ इति कंठतालुदंतस्थानत्रयवर्णात्मकमेतत्। अपरस्थानान्तराभा
॥२४॥ वात्॥ ॥द्विस्थानमाह॥ अनंगः कामस्तस्य लंघनमतिक्रमः तेन आलग्नः संबद्धो नानातंको व्याधिर्विरहदुःखरू
पस्याः सा अनंगलंघनालग्ननानातंका। सतीत्वोभनाचासौ अंगना च सदंगना। सदानघो निःपापः सदा आनं
दःसुखं च यस्य। नतमंगं येषां तेन तांगाः। त्वया विनतास्ते तन्नंगाः सख्यं यस्याः सौ नतांगासंगता स्या मे नयांहे स
दानघसदानंदनतांगासंगत सखिः सा सदंगना अनंगलंघनालग्ननानातंका वर्त्तत इति॥ कंठदंतस्थानद्व
यवर्णातिरिक्तवर्णाभावाद्द्विस्थानम्॥ ॥एकस्थानमुदाहरति॥ अगाः गतवानसि। गांस्वर्गं गांगं। गंगामाह
दं तज्जगतकं च गांगकमुदकं तस्य काकः कौटिल्यं तमकतीति सा काकः। गांगकस्य काकः कुटिलगतिः प्रवाहस्तस्य
गाहको विलोडकस्तस्यामंत्रणं। गांगकाकाकगाहक। अघं पापं। अघमेव काको गृहवलिभुक्तं हतवान्। अ
घककाकहासि लं। प्रपात्तं दर्शनादिहक्विप्। हा नहा· अहात्तात्याहत्ति गच्छतीत्यहाहानि· तान्यंगानि येषां ते राम॰ ॥२४॥

अहाहांगास्तेच तेखगाश्च अहाहांगखगाः सोपर्णीमास्ते॰ अंकोलांछनमेषां ते॰ अहाहांगखगांकास्तेच ते
अगाश्च मेर्वादयः पर्वताः तेषु अहहांकखगांकागेषु। मेर्वादिदेवगिरिषु कांकाश्च ते॰ अगखगाश्च॰ पर्वतदक्षिणा
करदः काकचः शब्दामस्याः सास्या वहाहांगखगांकागकं कागखगका कुकः। हे गांगजलकुटिलप्रवाहोवगाहक
मापवापसध्वंससो वर्णोमिपक्षिपरिक्षिप्तमेरुगिरिकुहराम पर्वतविश्रांतानंतकीर्तिप्रसरमहाप्रभावः स्वंस्व
र्गंगितवानसीतिकश्चित्तच्छोकंभावयति। वयंपुनरिच्छंव्याचक्ष्महे। गंगायाइदं गांगं तच्च तत्कं च तोदकं तत्प्रवि
शतीति गांगकाकं। प्रवाघच। यमुना। तस्याश्चांकः प्रवाहः तस्यगाहको विलोडकः कैटभारिः सकिलमातुलकं
सादेशात्॰ कालकालकालियरन्नाधंमथुरायां कालिंदीजलंवाहुभ्यामालोडितवान्। तस्यामंत्रणं॰ हे गांगका
ककगाहक। काकहा। सकिलवालभावमुद्द हनकंसेनानुप्रेषितंकाकदानवं उत्पाटितचंचुपुटं त्रुटितिकटर
टंतं हतवानिति। अहाहागखगोगरुडो ऽंकंचिह्नमस्यासावहाहागखगांकोगरुडध्वजः आगइवागो गिरिरि
वाप्रकंप्योधैर्यगुणासंपन्नः। कमुदकमंको मेषां ते काकाजलधयः अगाः पर्वताः मेरुनिषधादयः। खगाका

ह॰टि॰ शंकाकाश्चगाश्च खेचेति द्वंद्वः। ता निगच्छन्तीति काकाखगाकाकवः शब्दा यत्रांस्ति यस्याऽसौ कांगखगकाकुकः। अ
साधारणविशेषणोपादानादेव हरिरिसुच्यते· हे कालिंदीजलप्रवाहावगाहक· काकदानवविध्वंसक· गरुडध्व
॥२५॥ ज· मेरुपर्वतवत्प्रकंप्य· जलधिकुलानभस्तलव्यापियशः प्रसर हे हरे स्वर्गशातोऽशांतिकेनापिच्यतेइदमेकस्थाना
त्स्वरविसर्जनीयकवर्गैरेव निष्पन्नत्वात्। अकुहविसर्जनीयाः कंठ्या इति॥ ॥ तदेवं स्थाननियममभिधा
25 यवर्णनियममुदाहरति॥ ॥ रेरे इत्यधिक्षेपे संबोधनम्। असर्पं रौतीति रौरुः। स चासौ रुरुश्च मृगस्तस्यो
रुहृद्रूपं तस्य रुरुकपीडासेवागोऽपराधः तं गच्छतीति· रौरुरुरुरोरुगागोगः तस्यामंत्रणं· अगास्तरवस्तेषामं
गानि यत्र पुष्पफलवल्कलानि गच्छतीसमांगमः। न गच्छतीत्यगा गं। गावो धेनवो नवीनद्वा हश्च यस्याऽसावग
गुः गोपालः। किमित्यधिक्षेपे वर्त्तते· केकाकः शब्दो यस्यासौ केकाकः कुक्कोमयूरः स किं काकोऽपि तु वायसोऽपि
तु न भवति· किंतु केकाकाकुः। काकोनरूमामामाइत्याधिक्यनिषेधे वयं अमामामवगच्छाम। मन्नमामनमा राम॰
मः खिद मात्रं· मम ते प्रतिदहातियस्तस्य संबोधनं। हे रुरुमृगहृदयमहननापराधभाक्। तरुवल्कलधा ॥२५॥

रिन।तत्फलपुष्पास्मितमोवालकमूर्खमःकोकारवशागीसकिंकाकःनभवान्काकमयूरमोर्विशेविशेषं
वेद।अतएवनवममेवंविधमसंवहूकदाप्यंग्रामोऽवधारयामः।ममदुःखकारिन।असंवद्धाभिधायकइ
तिकश्चिद्दोपालकःकेनाऽपिमयूरंकाकमभिधानोनिषिध्यते॥ ॥त्रिवर्णमुदाहरति।देवानामिंद्रादीनांनंद
नःसम्रद्धिजननः।देवानामितिकर्मणिषष्ठी।नंदनःकर्त्तरिल्युट्।देवोदामोदरोनोदनोनिरसनः।वेदान्निं
दतियस्तस्यवेदनिंदनोवेदविद्वेषिणः।सदिवंगागनंदुदाववउद्देजितवान्।दानेनसिंहगर्जितेनःकुदादा
नेविदारणे।कस्य।दानववनंदिनः।दानवान्नंदयतिदानववनंदिःतस्यदैत्याधिपतेः।हिरण्यकशिपोरिति।ए
वमनुश्रूयते।पुराकिलसर्वविश्वमभंजगदितिहिरण्यकश्यपोर्नदनेनसंध्यावंदनवेलायामभिहितेहरि
स्तवामर्षितोदैत्याधिपतिःपार्श्वस्थंस्तंभुजेनाजघान।ततस्तंभात्सिंहरूपमुद्वहन्हरिराविर्वभूव।संध्या
समयएवजानुमोरूपरिदितिसुतमुपनिधायःखरतरनखविदारितोरःस्थलमभिहितःपरिकीर्णांत्रयं
त्रंविदारमांचकारसिंहगर्जितेचपरितःसत्रासुरसमितिचकार॥ ॥द्विवर्णमुदाहरति॥सूरिःप्रभुःजिह्वा

नै॰टी॰ लात्· सुराश्चासुराश्च सुरासुरास्तान्स्मरतीति सुरासुरस्मारी हरिः तं गच्छतीति सुरासुरस्मारिस्मारः। कर्मण्यण्। यद्वा
।सुरासुरस्मारी सारो बलं यस्य सः सो सुरासुरस्मारिसारः। सीरी हलायुधः। तडागानि सरांसि सरसीः स सारजगाम।
॥२६॥ किंविशिष्टः सबलदेवः। ससूरुः। शोभनावूरू यस्य सः सह ताभ्यां वर्त्तते इति ससूरुः। पीवरजंघायुगलः। सः सुरायाश्च
आस्वादः सो ऽस्यास्तीति सुरारसी॥ ॥एकाहरमुदाहरति॥ नूनं निश्चितं तुन्ना निखंडितानि· आननानि वद
26 नानि नो ऽस्माकं। अतेन अमुना पुरुषेण· आननं बलं तेन आननेन। नतेति प्रतिप्रतिषिधहमं विशिमवगमय
ति। तेन अनेन बलिना नूनं नन्नानि न स्वामीकृतानि· तुन्नानि एव आननानि अस्माकमनेनेत्यर्थः। तथा ना मम ने
न न मा पहीन· नलिति विवक्षितवितर्के ऽपि तु पापात्मक एव। तथा ना पुरुषश्च नेनु नेति। पुरुषो वामेन भव
ति। कोस्या विद्याहा इनः स्वामी। अनूने नाधिकबलेन· एमेन रएतेनः अवैरिणा हेतुभूतेन। ऐसो ऽपि एन देतादृश्चे
ति एतएमो नादेश्याः। आनानू प्राणान् निनीः नेतुमिच्छुः। तेनाप्यतेः किं अल्पे पिनिनीषितिभवति। कश्चिन्मनस्वी राम॰
प्रतिकूलस्य स्वामिनं मरणे तेनाधिबलेन पराजीयमानमुपलभ्य एवमाह। नन्नानेन नानि अस्मन्मुखानि न ॥२६॥

रंवल्लोपमानेनमलिनीकृतानि।तथाच्चपापघ्नकेवलंनभवति।योन्यूनाधिकवलेनारातिनास्मदस्मनपहरती
ति।इतिसाहित्यप्रकृतमुपसंहरति।इत्यनंतरोक्तक्रमेणानकेवलंसुकरमार्गः परिच्छिदहयेनोक्तः।तथाव्यपे
ताव्यपेतौभयसंकीर्णादिमध्यांतमध्याद्यंतसर्वपदार्धश्लोकन्याससममुरुप्रतिलोमगोमूत्रिकाद्युक्तमसवंती
भदनमहायमकस्वरस्थानवर्णनियमकथनेनदुःकरमार्गः।किंचिन्मनागादर्शितःक्रमःकथितप्रकारः॥ ॥इ
दानींप्रहेलिकाप्रकाराणांभेदानांपुनरुद्दिश्यतेगतिर्मार्गः।तत्रप्रहेलिकानांसोपयोगत्वमाह।प्रयोजनमनु
द्दिश्यमंदोऽपिनप्रवर्त्ततइति॥क्रीडागोष्ठीविनोदेषुविदग्धक्रीडार्थंतत्तदज्ञैर्विदग्धैराकीर्णमंत्रणेविदग्धज
नाकीर्णेपरिषत्संभाषणे।तथापरस्यदर्पाध्मातस्यव्यामोहनेतत्तव्यंजनेवसोपयोगाःप्रहेलिकाःप्रयोजन
वत्यःउपयोगिन्यःइतिः।तान्यपिदुष्करमार्गसंदर्शनेनावसरणावाऽभिधीयंतइति॥आहुर्बुधा इति।समागता
नामगूढार्थपदसंधिना।पदयोःसंधिःसंहिता।तेनपदसंधानेनवंचिता।नामसाम्यस्यार्थांतरेऽन्यत्रनरूढे
नशब्देनप्रकृतस्यार्थस्यवंचनाच्छलना॥व्युत्क्रांता।नामसाम्यापातिव्यवहितप्रयोगादतिव्यवहिताक्रिया

द०टि० कारकविशेषणाद्विशेष्यभावात्तद्भ्रान्तिकारिणी सा प्रमुषिता यस्यां पदावली दुरवबोधा ॥ सा समानरूपोच्य
ते । या गौणार्थारोपितैः पदैर्ग्रथिता । रचिता गौणार्थाः आरोपिता मेलिता निगौणार्थारोपितानि तैः । तैरजदं
॥२७॥ तादिवदारोपितशब्दस्य परनिपातः । तिन्यारोपितगौणार्थैरिति । परुषा नाम सा यस्यां लक्षणास्तित्वमात्रे
णानुलक्ष्यानुसारेणाकृतिर्व्युत्पादितः । संख्याता नाम सा यस्याः संख्या एकत्वादिका मोहस्य भ्रान्तिनिमित्तम
। सा प्रकल्पिता नाम यस्यां विवक्षितो वाक्यार्थोऽन्येन रूपेणावभासते ॥ सा नामान्तरिता नाम यस्यामभिधि
त्सितेनाम्निनानार्थस्य विवक्षितादर्थादन्यस्य कल्पना । सा निभृता नाम यस्यां निभृतो गोपितोऽर्थो विसमाना
दर्थाद्विवक्षितो यस्यां तुल्यंधर्मपर्यायेन मार्गेण वाचा । सा समानशब्दा नाम यस्यामुपन्यस्तोऽपशब्दस्तस्य पः
पर्यायस्तेन साधितः संपादितोऽर्थो यस्याः । सा मूढा नाम या सा वाच्याद्वावकेन कथितार्थाऽपि मूढत्वमेव भ्रान्त्यै स्या
त् ॥ योगमालात्मकं नाम यस्यां नामाभिधानं परिहारिकी नाम योगमालात्मकं परंपरात्मकमित्यर्थः । सा ए एम०
कच्छन्ना नाम यस्यामाश्रितमभिधेयं धर्मद्व्यणुगुणाकर्मलक्षणमभिव्यक्तं प्रकाश्यतो धर्मिधारस्याप्रकाश्यस्य ॥२७॥

धर्म्मिणोगोपनम॥ साभवेदुभयच्छन्नानामयस्यामुभयस्यधर्म्मस्यधर्म्मिणश्चगोपनम्। सासंकीर्णाना
मयस्यानानालक्षणोस्यसमागतादिपुंवदशभेदभिन्नस्यसंकरःसंसृष्टिः॥ एताइमास्ताःषोडशानिर्दिष्टा
उक्ताःपूर्वाचार्यैःप्रहेलिकाः। नकेवलमेताएव॥ तथान्याश्चतुर्दशदुष्टप्रहेलिकास्तैरेवाधीताःपठिताः॥ स्व
मतंदर्शयति॥ वयंपुनःसाध्वीरेवलक्षणावतीरेवषोडशाभिधास्यामः। नदुष्टांश्चतुर्दश। यतस्तादुष्टाउच्यं
ते। यास्त्वलक्षणाःलक्षणावर्जिताः॥ कुतः। दोषानपरसंख्येमानमन्यमानः। दोषाणामानन्त्यादनेकाश्चपिसं
भवन्तीतिचतुर्दशैवेतिनियमाभावात्॥ ॥समागतामुदाहरति निमयागोरसाभिज्ञेवेतः। आगोऽपराध
स्तस्यरसोऽनुभवस्तस्याभिज्ञमेमनः। कस्मान्निर्निमित्तकुप्यसि। अतोस्थानमुदितैरेभिः अलमालोहितेक्षणे
। माआगसपादेसंधिनागोपितीर्थः। वंचितामुदाहरति॥ कुब्जामासेवमानस्यमथातेवर्द्धतेरतिः। प्रीतिर्नैवं
निर्विशतोनारीस्त्रीरमरस्त्रीविडंविनीः॥ सुरसुंदरीप्रतिस्पर्द्धिनीरिसत्रकुब्जाशब्दोऽन्यत्रह्रस्वांगायांदीर्घज
पांमोषिजिप्रसिद्धिस्तेनकुब्जानगरीवंच्यते। कुब्जाकन्याकुब्जानगरीमासेवमानस्येसममर्थोविवक्षितः॥ कु

दं॰टि॰ तत्कांतामुदाहरति॥ हंसः पद्मिन्यामुखं चुंवति। तुंडेन स्वकीयेन चंचुपुटेन॥ किं कुर्वन्। घट्टयन्। कानि। अंगानि
।ह्का। दंडे। नाले। किं विशिष्टे। कर्कशकंटके। कस्या दंडे। पद्मिन्या एव। वल्गु मधुरं यथा भवत्येवं रवं कुर्वन्। प्रमुषि
॥२८॥ तामुदाहरति॥ अत्रोद्याने मया दृष्टा वल्लरी लता। पंचपल्लवाः किसलयानि यस्याः सा पंचपल्लवाः। पल्लवे पल्ल
वे यस्या वल्लपल्लिकाद्री प्रसन्ना अम्लाना कुसुममंजरीति मुख्यो ऽर्थः॥ गौराक्ता। वल्लरीव वल्लरी वपा शरीपादांगु
ष्टश्चेति पंचपल्लवाः। कुसुममंजरी हस्तयोः पादयोश्च सन स्वरूप्य यौ ऽगुलयः द्वशानच्छदे यं तद्दीप्रमः इति मुख्ये
न समानो गौराणो ऽर्थः॥ परुषामुदाहरति॥ ॥सुरादेवाः। सुरालये स्वर्गे स्थिता निर्विषादं तद्दीप्ताप्रकाशितदिना
गारस्त्रैरं भ्रमंति पर्यटन्ति। सुराणामिदं सौरं तत्र सौरे नंदनोद्यानांतर्वर्त्ति। सरसि मज्जंत इव जलक्रीडां कुर्वंतः
मत्ता इव दृष्टाः। संभ्रमंतीति प्रसिद्धो ऽर्थः। इयमेव वलक्षणा ऽस्ति लंबमात्रव्युत्पादितश्रुतिः परुषा भवति। सुराम
दिरां तां कुर्वतीति पुरादेशीयाः। सुरापतीति। पचाद्यच्। सुरामद्यं यस्य च निजः सुरालयेः सुराया आलयस्तत्र राम॰
मदिरागारे स्वैरं यथेष्टं भ्रमंति नमस्तेद्वावा सुरापाइदं सौरं तत्र सरसि सरः मद्यावपनमुद्रिकोच्यते। न ॥२८॥

28

वसौरंसरो मघावपत्तमिवल्लस्येप्रसिद्धिरितिपारुष्यमस्तिच। वाघादिकं लक्षणमिति। संख्यातामुदाहरति।
नासिक्यमध्या नासिक्यो मा मगो दोवरीती रोपांतवर्ती देग्रा स्तस्य मध्यामध्यवर्तिनी परितः समंततः। वनुभिर्व
र्णैर्लक्षणादिभिर्भूषिताऽलंकृताऽस्तिका विलुरी नगरी। यस्याः पुर्याम घवर्णाद्ध्मावपाश्च घवर्णाऽभिधाना
राजानइतिव्यामोहहेतुरर्थः। नासिकायां भवो वर्णो नासिक्योऽनुस्वारः मध्ये मध्यवर्ती यस्याः सा। नासिक्य
मध्या। परितउभयतश्चतुर्भिर्वर्णैः ककारोकारवकाररेकारैर्लंकृता पुरी कांची संख्यानं व्यामोह। निमित्तं तथा २
घवर्णाद्ध्मा तेपाः पल्लवः इस्मनु पकारौ द्वौ द्वौ लकारावकारारश्चेति। नयवकाराकारो विसर्जनीयाश्चेतित्रय
एव मघवर्णाः पल्लवाइस्मनुपकाः। वयं पुनश्छेकामुदाहराम। लकाराकारौ द्वौ ककारौ मध्ये नासिक्योऽनुस्वा
रइति चतुर्वर्णा विभूषिता घवर्णाद्ध्मा नृपा राज्ञः सारिफकारौ द्वौ ककारपकारा स्तपः। सकाराकारविसर्जनी
यास्तइति संख्यानं व्यामोहहेतुः॥ ॥ प्रकल्पितामुदाहरति॥ गिरा स्खलन्त्या नमिताशिरसा दीनया दृशा॥ ति
ष्ठंतमपि मामेवंविधं हे वद्दे किं नानुकंपसे। वद्दालस्त्रीसत्तद्विषवो वाक्यार्थः। बालुमिषकेनाप्युद्विग्नेनदरि

दं०८०

॥२९॥

29

दूरेणानपेक्ष्य स्त्री विषयश्चावभासत इति॥ नामांतरितामुदाहरति॥ आरोपुगादौ राजेसधीरत्तिहे चपलेः
पृथिव्या ईश्वरः पार्थिवः कोऽपि गीपतेः सुनातनश्चकृतावरापिश्रमव्यवस्थाश्च किंलसौनराजानन्तपतिस्तथा
नैवसमानश्चासौ पुरुषइति॥ व्याख्या हेहेतुरयः। कस्तर्हि सा विलुच्यते। सपार्थिवः पृथिव्याभवः पार्थिवो वक्र
राजादितत्तस्तारोम्नरपालराजाननाभिधानस्वरूप इति निश्च पार्थः। अत्र राजात इति नामतस्मिन्नानार्थस्य
नयत हलक्षणास्य कलानातरं तरितमिति नामांतरितोच्यते॥ ॥निभृतामुदाहरति॥ हृतमाछिन्नं द्रव्यं य
स्मादिति हृतद्रव्यो निर्द्धनस्तं हृतद्रव्यं नरं पुरुषं संत्यक्त्वा विहाय धनवंतं धनाढ्यं नानाभंगिभिः तैरकृष्टालोका
माभिस्ताः प्रवाति दुःखेनधिप्रायतइति दुर्धरास्ता हिं वेश्यास्ताभवेयुरिति। आह तवेश्याइति व्याख्या हेहेतुः कास्त
र्हि ताउच्यन्ते। अपदहवेश्यातेषामाख्यानामरषांतेप्रकृष्टकेशाख्याः प्रवालमणयो विद्रुमाः परमन्त्रपंतो
॰जितः प्रकृष्टः केशाख्यो येनासौ जितप्रकृष्टकेशाख्यपराजितः। प्रवालमणिरङ्गोतीरिक इत्यर्थः। यस्य व
नाविधंते भूधरास्येतभूमिकाः समाहूयोभिधानं यस्यासावभूमिकाहूयः। अधरः साधर्म्यं सुष्ठु अतिशयेन

राम०

॥२९॥

भूतजातोत्कलिकोत्कण्ठमस्यास्तं भूतोत्कम्। सुष्ठुजातोत्कंठ्यं करोतीति हि केवलभाविविशिष्टः इहोपन्यस्तः शब्दः प्रकृष्ट
केशाख्य इति पत्रस्य पर्याय प्रवाल इति पश्चात् भूमिकाङ्कूपः इति। पयस्पयोधर इति। प्रभूतोत्कलिकस्य पर्या
योसंजातोत्कंठमिसि ते पर्यायैः साधितात्प्रमादितादस्यार्थः। अतिसमानशब्द उच्यते॥ संमुखामुदाहरति॥ ॥ श
यनीये परावृत्त्य पराङ्मुखीभूय। शयितौ कामिनौ कामी च कामिनी च कामिनौ रुषा कोपेन तथैव वर्तितेन एव
प्रकारेण पराङ्मुखीभूत्वा विवशायितौ सुप्तौ रागादनुरागात्स्वैरं यथेष्टं मुखमाननमर्चुवतां इत्यत्र अनुपप
द्यमानोऽर्थः। न खलु पराङ्मुखीभूय कोपेन शयमानमोरधरचुंबनमुपपद्यत इति समाधानं तु तथैव शायितौ तेनै
व प्रकारेण परावृत्त्य शायितौ सुप्तौ। परावृत्तमोः पुनः परावृत्तिः संमुखीभवनं मत एव दोषाभावाद्भागादिति
शयने संमुखमोष्ठधरचुंबनमुपपद्यत एवेति कथितार्थापायं व्यामोहहेतुरिति संमूढोच्यते। परिहारिकी
मुदाहरति॥ विगृह्य डस्तेन जितः शक्रस्तस्यात्मभावस्तनुजोऽर्जुनस्तस्य द्वेषीकर्णस्तस्य गुरुः पिता अस्यादित्यस्तत्
स्यपाराकरणः तैर्हतः स्वं तपः जनो व्योमस्था कायमभिनंदति। किंविशिष्टं। घामम। कैः। हिमापहामित्रधरैः।

।हिमं शीतं तदपहंतीति निवारयनीति हिमापहो ऽग्निस्तस्यामित्रस्तोयं तदुद्रंतीति हिमापहामित्रधराः पयोधराः ।ौ
र०टि० :।अपातले शातमसीरूपपदयोर्विहितो ऽपिहंतेरन्योपपदविशिष्टप्रयोगो भवति ।येन दंशमशकापह हिमा
पहामित्रादिसिद्धाः ।एकच्छन्नामुदाहरति।। ।।नस्यष्यमापुधं नलश्शास्त्रंधतं नचस्त्रीगांस्तन मंडलंस्यष्यम।
॥३०॥ जातुकदाचित ।अमनुष्यस्यापि हस्तेयं न किलाफलः फलवर्जितः किलन भवति ।आश्रितो धर्मो ऽभिव्यज्यते ।आ
30 अमस्य धर्मिणो योगोपनपनमितिव्यामोहहेतुः अर्थस्तु परंड हस्तो मतो न निःफलसेतिलरडहस्तफलानि
हस्ताकृतिलाञ्च हस्तद्व हस्तऽच्यते ।अयं मनुष्य अराडो न चामस्त्रीकुव मंडलंस्य शास्त्रापुधं वादधातीति॥
।।ऽभयच्छन्नामुदाहरति।।केनवस्कनासहकः पदार्थः संभूयसंपुज्य सर्वकार्येषु अतिसंनिधिमुपयोगं लज्जा
प्राप्य यदि भोजनकाले दृष्टः स्यात् तदा निरस्यते अपनीयते ऽभयमयो धर्मधर्मिणोर्गोपनमित्युभयच्छन्ना
।अपा अपि नोऽप्रतिपादनात ।इति व्यामोहहेतुः ।अर्थः सुकेश्याख्यः पदार्थः ।केनमस्तकेन सह संपुज्य सर्व ए.म०
कार्येषु स्नानतैलाभ्यंगवंधनादिषु संनिधिमुपयोगं प्राप्य भोजनभाजने उपलब्धो यदि स्यात्तदा तु तो निर ॥३०॥

त
स्यं इति। संकीर्णमुदाहरति।। ।। सहसा सगजा घटासेना वाहिनीयं जिना पराजिता स्यादनेन तदायंत
त्पुत्रको मातृको मृगो विकल्पभूम्यः अन्नाम्नि मृगानस्तु त्रोपतो इत्यादत्तु इति व्याप्तो ह हेतुः। हय म अश्व हयो ज अज
अगजो। मश्वट अश्वभटौ इ अश्व नश्वदनौ सहतास्यां वर्त्तत इति सहजा सगजा सभटा सेना मातृकेति विनानार्थके
तथा वंचिता उपयोगिनी इयं वंचिता सत्र नृष्टेमपत्र शब्देन वंचनमिति। सिद्धमातृका अकारादि हकारपर्यंता
निक्षिता निवसिनानोपनामकमातृको ऽस्मपुत्र दसनेन मृग अश्वन भवति। अत्तरज्ञो विद्वानिति। इयं नामांतरि
त मिश्रा। सानामांतरिता मस्यानाम्नि नानार्थकल्पने लुकमम मातृक इति यन्नाम तत्र नानार्थस्य जननी सिद्धमा
तृकेति वचनार्थकस्य नार्थकता तथा वाचितानुपयोगिनी इयं वंचिता ऽन्यत्र नृष्टेमपत्र शब्देन न वंचनमि
ति। अन्यत्र नृष्टशब्दो गज इति वहम। इति च। गोभट इति यत्नौ सेना इति वाहिन्यां तेन वंचितेः हयगजभटाकार
वर्णा इति।। उभय प्रहेलिकालक्षणा संसर्गात् संकीर्णोच्यते। एवं संकीर्णालक्षणालक्षणांतो निःष्यंद्य विशेषा
णाम तिस्त्र्यं कथेति। एवमितरासाम। अनेनैव प्रकारेणाइतरासामपरो सामपिमुकांतादिमिश्राणांम

द०टि०

॥३१॥

31

पिसंकरक्रमः सांकर्यप्रकारस्तन्त्रेमकुल्लइति॥ ॥इदानीमपार्थइत्यादिनादशकाव्यदोषानाह। गुणादोषस्व
रूपानभिज्ञस्यदोषपरिहारेणकाव्यकरणेगुणदोषपरीक्षायाः। गुणदोषानशास्त्रज्ञःकथंविभजतेजनः।
तदल्पमपिनोपेक्ष्यंशास्त्रेदुष्टंकथंचनः इत्यतःकाव्येदोषानकथयंति। अपरेभामहादयो ऽपार्थादिवत्प्रति
ज्ञाहानिदोषो ऽपिकाव्येपरिहर्त्तव्यइतितल्लक्षणमपिप्रणीतवंतः। तदसदितिमतंदर्शयति॥ प्रतिज्ञादिहा
निदोषः। साध्यनिर्देशःप्रतिज्ञा। साधनंहेतुः। अलौकिकपरीक्षमोयत्रबुद्धिसाम्यंसदृष्टांतः। तेषांहानिःसदोषो
नवा ऽसौदोषइतिविचारःप्रायःकर्कशस्तेनालीढेनकिंचित्तस्यतर्कत्रयादिशास्त्रंनधर्मिसस्माभिः प्रतिपा
द्यते॥ ॥अपार्थलक्षणमाह॥ समुदायार्थशून्यं·वाक्यार्थशून्यं॥ यत्तदपार्थमितीष्यते· अस्यापवादमा
ह। तन्मत्तोन्मत्तबालानामाउक्तिस्तस्याअन्यत्रदुष्यति। मत्ताद्युक्तावदोषो ऽपार्थाद्यभिधानेपीत्यर्थः॥ ॥
अपार्थमुदाहरति॥ समुद्रःपीयतेदेवैरित्यादि। ईदसमुद्रइत्यादिनाव्याख्यातम्। इदमेवंविधमपार्थ
कमस्वस्थचित्तानांमदिराणांतिरस्कृतानांमत्तानामुन्मत्तानांलोभादिकामादिचौरराजाद्युपप्लुतचित्ता

राम०

॥३१॥

नामभिधानमनिर्दिष्टमेभ्योऽन्यत्रस्वस्थकविः कोवाप्रयुंजीतएवमादिकमिति॥ ॥व्यर्थलक्षणमाह॥ए
कवाक्येप्रबंधेवापूर्वापरपराहतम्॥विरुद्धार्थंतथाविरुद्धोऽर्थोऽस्येतिविरुद्धार्थम्‌ तस्यापार्थमित्यनेनै
वागतत्वात्तस्यदृष्टदोषेष्वुच्यते॥तदुदाहरति॥जहिमारमशत्रुकुलंश्चराति समाजमशेषम्‌।जयविश्वंभ
रामिमाम्‌।इतिशत्रुवधीमहीविजमश्वपूर्वार्द्धेनोक्तः।नचतेकोऽपिद्वेष्योरिपुः नवतवाऽस्तिकश्चित।इत्यु
त्तरार्द्धेनपूर्वार्द्धस्यविरोधः।भावाऽभावयोःपरस्परविरोधाभावादिति।अस्यापवादमाह॥अस्तसौकावि
दवस्थापस्यांविरुद्धार्थापिपूर्वापरहतापिभारतीस्यादभिमता कस्यसावस्थेत्याह।सामिषंगस्यचेतसः
।कामादिपरवशस्यमनसः।तदुदाहरति॥परदाराभिलाषीमेकथमार्यस्यपुज्यते इतिपूर्वार्द्धेनपरस्त्री
गमनप्रतिषेधोऽभिहितः॥पिवामितरलंतस्याःकदानुप्रीतयेदशनच्छदमधरमित्युत्तरार्द्धेपूर्वोक्तबा
धातेऽपिनदोषः।मतउक्तमन्यैरपि।कामार्त्ताहिप्रकृतिकृपणाश्चेतनाचेतनेषु इति॥एकार्थलक्षणमा
ह॥ ॥अविशेषेणपूर्वोक्तंयदिभूयःपुनरपिकीर्त्यते तदर्थशब्देनार्थेनवाइतिविविधमाह॥शब्दपुन

दं०टी० रुक्तमर्थपुनरुक्तं च। अनित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तम्। अनित्यः शब्दो निरोधमात्मिको ध्वनिरिति।
॥३२॥ एतदेकार्थमतमिति। तदुदाहरति। तदुदाहापति॥ उत्कामुत्सुकामुन्मानयंति उत्सुकमनसं कुर्वंति। बालांत
मस्यालकाः केशास्तेषामिव लिपिर्येषां ते तैस्तदलककलिपः। तकुंतलकलापककांता अंभोधरास्तडिलंतो गंभी
रास्तनयित्नवः। इत्यत्र पौनरुक्त्यमविशेषोक्तत्वात्। अंभोधरा इत्यनेनैव कृष्णस्यो कृत्वात् तदलककलिप
मित्यनेनाऽपि कृष्णत्वमुक्तम्। तथांभोधरास्तडिलंतस्तनयित्नवः। इत्य विशेषेणा मेघानामभिधानात् पौन
रुक्त्यम्॥ अस्यापवादमाह॥ अनुकंपाद्यतिशयो यदि काश्चिद्विवक्ष्यते। तदा पुनरुक्तेपि दोषो नास्ति। प्रयु
ते यमलंक्रिया पुनरुक्तिस्तदुदाहरति। हन्यते मार्यते सादयिताः किं विशिष्टासावरारोहा। चारुसर्वांगीति
पुनरुक्तेन दोषः। अनुकंपया कारुणिकजनस्येदमुक्तत्वात्॥ ॥ संशयलक्षणमाह॥ निर्णयार्थमित्यादि।
। यदि निर्णयार्थं प्रयुक्तानि वचांसि संशयंति। तदासौ दोष एव संशय इति। तदुदाहरति। मनोरथश्चासौ राम०
प्रियालोकश्च तस्य रसस्तेन लोले इ सखीयस्यास्तस्या आमंत्रणं हे सखि मनोरथप्रियालोकरसलोले ॥३२॥

32

त्तरीयेनेयमवस्थाकृता।तमवलोक्यानयेत्युक्तो।असौमातामम हृदयसंतापस्याद्भुतिःदूरवर्त्तिनीनत्त
माउष्टुमवलोकयितुंसमर्थेति।तत्रैतानिपदान्यमुमेवार्थमभिधातुमिष्टानि।कथाविदनुक्रमा।हेसखि
मनोरथप्रियालोकरसलोलेत्तरीमयामाताजननीआभंहिता।भूयोऽपियामयेनवल्लभेनममदर्शीसं
जनितकस्मादवस्थानंतमानय।अमुनम।सावमन्माताापिननिद्युति।मसंतापस्यदूरवर्त्तिनीसतीतमी
दृशंवल्लभंद्रष्टुंतंपरंरूपेतिनवायमर्थोमेभिःपदैरभिव्यज्यते।आराद्वर्त्तिरित्युच्यतेनक्षापते।कस्माराज्ञ
।तथाऽऽरेदूराभित्युच्यतेनज्ञापते।कीदृशंकिमिवकिंतदितिकाभिव।कीदृशंतंवल्लभं।सुगतंउतकीदृशं।
।मांविरहपीडितामुतेदृशंमदवस्थांतरं।तथाकस्यदूरवर्त्तिनीमन्मनः।संतापस्यउतप्रांमनगरादेरभिः
संशय।तदुक्तंभमम्महेनाक्ष्ठतेःसामान्यधर्माणांविशेषस्यामुदाहृतेः।अतिष्ठपदेकत्रजानंसंशयंविदुः
रिति।अस्यापवादमाह।इदृशंसंशयायेवपिदृजानुप्रयुज्यतेयदासावलंकारणवासौनदादोषोनभव
ति।निर्णयार्थंप्रयुक्तानिसंशयेंजनयंतितदादोषइसंपर्कः।तदुदाहरति॥पश्याम्यनंगजातंकलंधितां।

द०टी०
॥३३॥

तामनिंदिताम्। अनंगः कामस्तस्माज्जातोऽनंगजः सुवासा वक्रकश्चतेनलंघितापीडितासखिकाले
नैवकुंठोरेणा वमत्सुनौ वक्रूरेरोगौ वग्रस्तामाघ्रातामतास्तहारापा। तथांगजः कामः सरावांतकस्तेनलं
घितापतिपेपथेन अंगतां गोकलंघिताकालेनैवकठोरैरोगौवग्नीष्मसमयेनैवअन्यागतमत्तं किंनस्त
दारापाराततस्वपंथ्याचष्टे। किमसौ कामार्त्ताघर्मतप्ताऽस्ति अप्रकरं वचः उभयार्थविविक्तो हिमुवान
माकुलीकर्तुमितिहृत्साहा। नर्मसख्या॥ ॥अपक्रमलक्षणमाह॥ उद्देशानुगुणोऽर्थानामनुद्देशो न चेत
कृतः उद्देशो न चेत्कृतः उद्देशनिर्देशयोर्यदि पथासंख्यानक्रमम्। तथा हि। नाप्यामेव तयथोद्देशः। तद
तिलंघन अपक्रममुच्यते तदुदाहरति॥ स्थितिनिर्माणसंहारहेतवो जगतामताः॥ शंभुनारायणांभो
जयोनयः पालयंतु वः॥ जगतां स्थितिनिर्माणसंहाराणां हेतव उद्देशस्यानुगुणो। निर्देशः। एवंकर्त्तव्योप
क्रमः स्यात्। नारायणांभोजयोनशंभव इति यसयथासंख्यात्ततोपक्रमे एवंविधं तत्प्रयोक्तव्यम्। अस्यापवा
दमाह॥ मर्त्तलः संबंध विज्ञानहेतुकोपि कृतोऽपि मदि। संबंधनिर्णयमिहेतुर्यदि कश्चित्समपत्तः कृतः स्यात्

राम०
॥३३॥

33

दाक्रमातिक्रमाभावोऽपि न दोष इति सूरयो मन्यंते ॥ तदुदाहरति ॥ वंधुत्यागस्तनुत्यागो देशत्याग इति वंधु
त्यागो ज्ञातिविषयो योगः। तनुत्यागो मरणं। देशत्यागो जन्मभूमेरन्यदेशगमनं। आद्यंतौ वंधुत्यागदेशत्या
गौ आपत्क्लेशौ दीर्घदुःखौ मध्यमो मरणं स्त्रीणां कष्टतरं तत्त्वात् दुःखद इत्यत्र संबंधनिर्णयहेतुर्य
त्नः कृतः। आद्यंताविति यथा मध्यम इति तत एवं विध प्रयोगे न दोषः॥ शब्दहीनलक्षणमाह॥ शब्दहीन
मनाल्पसल्पलक्षणापद्धतिः। अनाल्पसल्पलक्षणाविवर्जितमित्यर्थः। तदुदाहरति॥ अवति भवतो वाहु
महीमर्णावसंकरां। समुद्रमेखलामिमां भवतो वाहुरवते राजन्नां न जिज्ञासाज्ञानुमिच्छाममास्य वसुना
ती ति संज्ञापाभावात्। इत्यसमामेवं विधानां लक्षणलक्षणाविवर्जितानां गिरां नरसो नरस्य वक्तास्तीति। तथाहि।
।शक्करीशब्दो न लक्ष्येक्वापि मेखलापर्यायः प्रयुक्तः। शिष्टैरुपलभ्यते भवतेर्तिनि संबंधे च तुष्ण्याऽभिधानात्।
अवते इति वात्मनेपदानुपपत्तिः। महाराजन्निति च समासांतप्रतिषेधानुपपत्तेरिसनाल्पसलक्षणात्
।छंदोहानमेवं विधं न काव्ये प्रयोक्तव्यं प्रसिद्धवृत्तानुसारेणालक्षणस्य शिष्टैरिष्टत्वात्॥ शिष्टैर्यं पत्तन्न दुः

टि०टी० ष्यतीति। अनिष्टं तत्तद्दुःष्यतीति। अस्यापवादमाह। दक्षिणादूरपसन। मलयपर्वतादपगच्छन्मारुतः
सूतपादपान्सहकारनेरून एवंभूतान्विदधाति। ललिताधूतप्रवालांकरशोभिनः। ललितं यथा भवत्येवं
आधूता ये प्रवालांकुराः तैः शोभंते इत्येवंशीलाः तानिति विधेयामएतत्त्वयंत्याचष्टे इत्यादिशास्त्रदर्शनालस
॥३४॥ यतस्व।। अपभाषणादशनाभियुक्तानां व्याकरणाविशेषणलक्षणापरिज्ञानमन्यानामपशब्दं वदतिभा
षते। स च तदृष्टमनोविमृशमानमपभाषणं यज्ञेन सौभाग्यसुंदरत्वमुद्गतिम्त्यजति। तथा हि उपसरनसत्रे
धावादेशः प्राप्नोति। कुरुते इत्यत्रात्मनेपदं न स्यात्। कर्त्रभिप्रायस्य क्रियाफलस्याभावादिति। न चेदमभा
षणं सत्तेर्जवे धावदेशो नापगमोच्छरित्। हि ततः कर्त्रभिप्राये क्रियाफले इति भवत्यात्मनेपदं कर्त्रभिप्रायस्य
क्रियाफलस्य विवक्षितत्वादिति। यतिभ्रष्टत्वमाह॥ श्लोकेषु नियमस्थानं पदच्छेदं यतिं विदुः। तद्यत्रोप
रिहितं द्ध्यति भ्रष्टमुच्यते॥ तं यथा श्रवणोद्वेगजननं करोति कटुकं। तथैवमुदाहरति। स्त्रीणां संगीतविधिमय ए०प्र०
मादित्यवंश्यो नरेंद्रः। स्त्रीणां संगीतविधिं न संगीतवाद्यविधिं अश्लिष्टरसमविनयरागादिविशेषं। मनुष्य ॥३४॥

तीसत्रमहाक्रां ताममनततमार्गःसद्गुल्योकेरीति। चतुर्थषष्ठसमस्थानेविरागउक्तः। सचभज्यतेयत्तस्ततार
वंविधंयतिभंगंवर्जनीयं। यतिभंगमभ्युपगतमाह॥ कार्याकार्यरूपयमविकल्पान्यागमेव पश्यन्ब्रूयामुं
वीविहतिनपदद्व्यस्तिचैवंप्रयोगः। यमस्य शमममहालुंप्तेवदांतेशिष्टस्यपदत्वंनिश्चितंयथा। तथासविकारां
तंचपदमेवेतिवर्ण्यते। यथादधीसख्यानीनपुंसकादितिप्रथमैकवचनेशिष्टस्यप्रकृतिरूपस्यसुप्तिङंतं पद
मितिपदत्वेनिश्चितमपितिमेवकार्याकार्यस्थलीसत्रश्रममविकल्पानीसत्रआगमेनैवेस्तन्नवेकोपराचीतिय
गादे। शोकृतेयकारनष्टमार्यादितव्यंजनानिभवंतीतिपुरेणासंवंधिविकारांतंपदमिति। संसमुद्गुलोकैःवि
मरामस्तीतिनकर्णाकटुकमाभाति। एवंविधमिष्टंशिष्टैरितिनदोषः। संधिविकारांतमपिश्रवणोद्वेजनंवर्जनी
यमित्याह। तथापिकटुवर्णानांकवयोनप्रयुंजते। यद्यपिसंधिविकारांतंपदमेवेत्युक्तं। तथापियत्कटुवर्णकं
तन्नप्रयोक्तव्यंतदुदाहरति। ध्वजिनीतस्यराज्ञःकेतूदस्तजलेसदःकेतुशब्दस्यउदशब्देनअकुःएवंरोदीय
इतिसंधिविधानेसंधिविकारांतंपदमितिपदत्वेतकारस्यपरेणासंवंधेपिध्वजिनीतस्यराज्ञःकेदतिपर्यंतस्य

कर्णकटुकत्वात् ॥ न प्रयुक्तमिष्यत इति वर्जनीयं भिन्नवृत्तलक्षणमाह ॥ ॥वर्णानां पतनाधिक्ये गुरू-
वृ०टी० णां लघूनामन्यथोपस्थितिः वर्णानामक्षरादीनां यत्र छंदोनिबंधे वर्णसंख्या न्यूनाधिका वा यथा गुरूणां ल-
घूनां च यत्र व्यत्ययस्तद्भिन्नवृत्तमित्युच्यते एषोऽपि सुनिश्चितः। अस्यापवादो पोथ्यादिरिति वनास्तीत्यर्थः।
॥३५॥ सुनिंदित इति च पाठांतरं। तत्र न्यूनाक्षरमुदाहरति। इंदुपादाः शिशिराः स्पृशंति न्यूनवर्णता। इंदुपादाः
35 शिशिरा इत्यत्र पादे सप्तैवाक्षराण्यनुष्टुभीति। अधिकाक्षरमुदाहरति। सउकारस्य किशलयान्याद्रभाणि
धिकाक्षरं। नवाक्षरपादः। गुरुलघुतयोः स्थितिमाह। कामेन वाणा निशिता विमुक्ता मृगेक्षणा स्विसमयथा गु-
रुत्वं। पंचमं लघु सर्वत्रानुष्टुप्छंदसि सप्तमं गुरु द्विचतुर्थयोः पादयोः एवं गुरुत्वं चतुर्थपि पादेषु भवत्यक्षरं
इति पनेनियमः। इह तु कामेन वाणा इति पंचमं गुरु भवत्यत्र प्रथमपादे सप्तमाक्षरस्य लघुत्वाद्यथागुरुत्वं।
उत्क्रमयथागुरुत्वं यथालघुत्वमाह॥ मदनवाणा निशिताः पतंति वामेक्षणा स्विसमयथालघुत्वं। इह षष्ठेस्था रत्ना०
नेगुरुणा भवितव्यं पंचमेन लघुना। सप्तमं द्विचतुर्थयोः पादयोर्लघुः प्रथमततीययोश्च गुरुर्भवतीति ॥३५॥

लघुत्वप्रयुक्तमिति सपथ्यालघुत्वं निश्चितं छंदोदोषः। विसंधिलक्षणमाह॥ ॥न संहितां विवक्षामीत्यसंधानं
पदेषु यत्। तद्विसंधीति निर्दिष्टं न प्रगृह्यादिहेतुकम्॥ संधिर्विवक्षितो भवतीति पदसंधानं तद्विसंधीत्युच्य
ते। प्रगृह्यादिहेतुकं न विसंधि। तथा हि। ई ऊ ए द्विवचनं प्रगृह्यं। अदसो मात्। निपात एकाजनाङ्। अग्नी इमौ
पजस्वेति। पटू एतौ न पालजौ। पचेते ओदनं कन्ये एते। अमी उष्ट्राभरद्दमाः॥ ॥एवं किल मन्यसे देवदत्ताइ
हा व्रजइति॥ प्लुतप्रगृह्यानामसंधिर्न विधिना एवमादिषु प्लुतप्रगृह्या अचीति संधिर्नाम दोषः। विसंधिमुदा
हरति॥ ॥मंदानिलेन चरता अंगनागंडमंडले। लुप्तमुद्भेदघर्मांभो नभस्यस्मन्मनस्यपि। मासुरान्निव
तिप्राशिरणरूपाख्यानब्धं। नभि दृष्टं मंदानिलेन दक्षिणमारुतेन नभसि चरता अंगनागंडमंडलेन केवलमुद्भे
दिघर्मांभो लुप्तं मस्मन्मनस्यपि। आसुरात्रिष्विति। तेन घर्मांभो गौष्मजनितमंभो लुप्तमेवेत्यत्र मंदानिलेन
चरता अंगनेति च द्वयोराकाराकारयोरेकता: तच्छंदोभंगभयादसंधानं शिष्टं संधिलाददोषः। आधिराधि
परीताश्च घोष्वी वाचि नाशिने इत्यादिकमपि शिष्टदिष्टसंधिमुदाहरणमूह्यमिति। एवं प्रकारमन्यदपि

रं०टी० प्राज्ञैर्विद्वद्भिराज्ञातव्यम् । गन्यूनदोषं ज्ञातमिति । देशकालकलालोकन्यायागमविरोधिषूक्तं । तत्र
देशादीनामागमांतानां लक्षणमाह ॥ ॥ देशोऽद्रिवनराष्ट्रादिः नराष्ट्रादिर्वर्णनं सादरादकरियो निपदूक्तं
॥३६॥ नरपरे । निवेशो द्रव्यहस्तिवनमिति । ग्रामजनपदो ग्रामस्थानीमादिरादिशब्देन राज्याकरादिग्रहणं । का
36 लः पुनर्नक्तं दिनर्तवः । नक्तं वदि वा वसंतादि ऋतव इति द्वंद्वः । नक्तं रात्रिः । दिवा दिवसः । ऋतवः शरद्वसंतशिशि
रवर्षाग्रीष्मवर्षाद्याः षट् । नृत्यगीतप्रभृतयः कलाः । नृत्यं लास्यादि । गीतं पद्धादि । प्रभृतिशब्दाद्वाद्यादिवच
नतेन गृहीत चित्रपत्रच्छेदादयः । कामार्थस्य संश्रयोऽथवा यासां कामार्थयोः संश्रयास्त्राधारभूताः कला
ः । वरावराणां चेतनाचेतनानां भूतानां प्राणिनां पृथिव्यादीनां वा प्रवृत्तिः स्थितिस्वरूपं लोकसंज्ञिता लो
कशब्देनोच्यते । हेतुविद्यात्मको न्यायः हेतुविद्याप्रतिपादकः तर्कः तदात्मको न्याय उच्यते । पंचावयवस्य
हेतोस्तथा न पक्षव्युत्पादनात् । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । पक्षधर्मस्तदंशेन व्याप्तो राम०
हेतुस्त्रिविधो रसः पक्षधर्मान्वयव्यतिरेकात्त्रिरूपाणि च यौगपव रूपलिंगानिकार्यस्वभावोऽनुपलंभः ॥३६॥

अतिवचनात्। साध्यभावसंभवनियमनिरासे कलत्रयोर्हेतुरिष्यत इति। रूप अलंवित्तत। हेतुविद्यात्मको न्या
य इति तेन समस्तं संख्यादिसमयलप्रतिपादकविद्यात्मकं इत्यादिग्राह्यं। सश्रुति। स्मृतिरागमः। श्रुतिः सामऋग्
यजूंषि। अथवा वेदेतिहासवेदैश्च। स्मृतिशब्देन मन्वादयोष्टादशसंहिता गृह्यंते। सह श्रुतिस्मृतिभ्यां वर्तत
इति सश्रुतिस्मृतिरागम उच्यते। त्रयीप्रोक्ता धर्मास्तेषु यथा नूनं प्रसिद्धं देशादिषु यदि किंचिल्लमादाद्देशादि। अ म५
परिज्ञानादनुवर्त्तते। तदा देशादिविरोध उच्यते। तच्च यत्नतः परिहर्त्तव्यं। तत्र देशविरोधमुदाहरति। कर्प्पूरपा
दपांसुरसुरभिर्म्मलयानिलः। कलिंगवनसंभूता मृगप्राया मतंगजाः। चोलाः कालागुरुश्यामाः कावेरीतीर
भूमयः। न खलु मलयदेशे संति कर्प्पूरपादपस्पर्शसुरय मलयमारुतः। कटाहद्वीपे कर्प्पूरद्रुमाणामुत्पत्ति
:। तथा न खलु कलिंगवनसंभूता मृगप्रायाः करिणो भवंति। भव्यास्तत्र गजाः। तदुक्तं। कलिंगगजाः श्रेष्ठाः। तथा
न चोलदेशे कालागुरुतरवः किंतु नेपालदेशे। तत्कथं चोलानां निवासाश्चोलाः कावेरीतीरभूमयः कालागुरु
भिः श्यामाः का कावेर्यास्तीरस्य भूमयः कावेरीतीरभूमयः। अपरे पुनर्वदंति कालागुरुश्यामाः कावेरीतीरभूमय

र०टि०

॥३७॥

37

इति पठति। तत्र बालकालागुरुभिर्बालकृष्णागुरुतरुभिः श्यामा इति व्याख्येयं। इत्यादि देशविरोधः। देशवि
रोधमुपसंहरति। इति देशविरोधन्यायाच्च प्रस्थानमीदृशं। सुगमं। कालविरोधमाह॥ ॥पद्मिनी नक्तमुन्नि
द्रा स्फुरत्यह्नि कुमुद्वती॥ मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः। श्रव्यहंसगिरो वर्षाः शरदो मत्तबर्हिणः। हे
मंतो निर्मलादित्यः शिशिरः श्लाघ्यचंदनः। न पद्मिनी नक्तं विकसति किं त्वह्नि। न कुमुद्वती दिन स्फुटति किंतु
रात्रौ। तथा न वसंते कदंबद्रुमाः पुष्प्यंति। किंतु वर्षासु। तथा न ग्रीष्मे मेघैः सांधकाराणि दिनानि किंतु। वर्षासु
। न च वर्षासु हंसानां रुत्काध्वनयः किंतु शरदि। तथा न शरदि माद्यंते मयूराः किंतु वर्षासु। तथा न हेमंते दिनक
रो दीप्यते तदा हि मंदमंदद्युतिः। तथा न शिशिरे श्लाघ्यते न चंदनं। अतिशीतेन शीतस्य स्पर्शानिरिष्टत्वा
त्तदा हि कुंकुममभिलष्यंति विलासिन्यस्तस्योष्णस्पर्शत्वात्। इत्यादिना कालविरोधमुपसंहृत्य कलावि
रोधमाह॥ ॥वीरशृंगारयोर्भावौ स्थायिनौ क्रोधविस्मयौ॥ न हि वीरशृंगारयोर्भावौ स्थायिनौ क्रोधवि एस०
स्मयौ। क्रोधो हि रौद्रस्य स्थायी भावः। न च वीरस्य तत्साहस्थायी भावः। तथा न विस्मयः। शृंगारस्य किंत्वद्भुत ॥३७॥

स्वस्थायीभावः।पूर्णाःसप्तस्वरायस्यांसौपूर्णसप्तस्वरःभिन्नमार्गःप्रवर्त्ततेभिन्नमार्गश्चातकंपूर्णीघरइति
।इच्छंकलाचतुःषष्ठि।अनेनप्रकारेणकलाचतुःषष्ठ्याख्यानेनापांचाल्याविरोधः।कलानांनृत्यगीतवाद्या
दीनांविरोधःमाधुर्यथाभवतितथाएवंनीमतामस्पृह्यताभिति।तस्याःकलाचतुःषष्टेःकलाःपरिच्छिद्यंते
यत्रसकलापरिच्छेदोग्रंथस्तत्स्वरूपंभाविर्भविष्यतीति।।ततएवकलौ।वास्वरूपमवधारणीयमित्यर्थः।लो
कविरोधमाह।। ।।आधूतानिकेसराणियस्याःसोऽआधूतकेसरोहस्ती।नहिहस्तिनःकेसराणीतिविदितं
।किंतुसिंहेकेसरत्वसिद्धिः।तथानतीक्ष्णश्रृंगःस्तुरंगमः।किंतुगवादिः।तथानरावंडीगुरुसारोनिःसार
णामुदाहरणामसौचनिःसारःप्रदिरसारचंदनसारइतितत्रैवलोकप्रसिद्धेरितिलौकिकएवायंलोक
प्रसिद्धएवायंआधूतकेसरोहस्तीत्यादिसर्वजननिंदितः।न्यायविरोधमाह।। ।।सत्यमेवाहसुगतःबुद्धो
ब्रवीत्यवित्यमेव।संस्कारानूपादिविषयुवासनाविन्नधर्मानविनश्वराणिसाःतदेवार्थांतरन्यासेनद्र
ढयति।तथाहि।सावकोराज्ञीकांताख्यितेवञ्चघापितदीपघाभिमन्यनसीसन्नसाविरोधोप्रमानस्य

मुसुगतः संस्कारानविनश्वरानाह सर्वभावानां चैवं क्षणावस्थापित्वाभ्युपगमात् सर्वे भावाः क्षणिकाः
टि०टी० सससनित्यक्रमयोगांमर्थक्रियानुपपत्तेरित्यनुमानेन। तथान्यायविरोधस्योदाहरणांतरं दर्शितं॥ ॥
कापिलैरसदुद्भूतिः। कापिलीयैर्मुनिभिरसदुद्भूतिः असतः पदार्थस्याविद्यमानस्योद्भूतिरुत्पत्तिर्ध्यान
॥३८॥ रावोपवर्ण्यते मुक्तेर्वाभिधीयते। तदेव समर्थयते ऽर्थांतरन्यासेन। असत्तामेव शिष्याणां दुर्जनानामवन
सत्तां सज्जनानां दृश्यते यस्माद्धेतोरस्माभिरुद्भवा। असुरस्याधर्मधर्मयस्तथा असत्तामेवाविद्यमानामेवका
र्यकारणानां भाव उत्पत्तिरपीदृश्यते। इति न्यायविरोधोपनखलु सख्ये रसत्कारणोः कार्य उत्पद्यते इत्यभ्युप
गमात्। असत्कारणादुपादानादुत्पत्तिर्नासत्कार्यवा चाभ्युपगतत्वात्। एवमनेनक्रमेणानीति न्यायवि
रोधस्य सुगतादिसमयस्य सर्वत्र समयांतरेऽपि दृश्यतां। अथ न्यायविरोधस्यानंतरमागमविरोधप्रस्था
नप्रक्रमाद्दर्शयिष्यंते ऽमयेत्सध्याहारः। तथा हि॥ अनाहिताग्नयोऽप्येते अकृताग्निपरिहाराः अपि विप्रा
अजातपुत्रा अकृतविवाहा अनुसन्नपुत्रः विश्वानरस्येयं वैश्वानरी तामिष्टिं मन्निष्ठो मादृकं चित्तत्वात्। एम०

38

॥३८॥

।अक्लिष्टमनिंदितमाचारो भूषणामलंकियामाश्रितेति तथाभूतविधाऽस्यागमविरोधः। यतो ब्राह्मणेन
कृतोपनयनेन वेदोऽध्येतव्यः कृतसमावर्त्तनेन वेदमधीत्य स्थ्यादिति। वेदाध्ययनानंतरं दाहरकर्म ततो
ऽग्निपरिग्रहः सदारस्य। तथाग्निष्टोमयजने विकारो नानाहिताग्नेरिति द्वितीयमागमविरोधस्योदाहरणं द
र्शयति॥ ॥असावनुपनीतोऽपि अकृतमौंजीबंधनसंस्कारविधिरपि वेदानसामामादीन्गुरोरध्यापका
दधिजगेऽधीतवान्। नन्वनुपनीतस्य वेदाध्ययने कथमधिकारः। अत आह। स्वभावशुद्धः स्फटिकः स्वभावा
न्निसर्गतः शुद्धो निर्म्मलः संस्कारं नापेक्षते। तथापि प्रोपीति। एतदागमविरोधि वरो यतो कृतसंस्कारो विप्रो
जातः स इत्युच्यते। तस्य च न वेदाध्ययनेऽधिकारोऽस्ति। वृत्तोपध्ययनस्यत्रप्यधिकारो नान्यथेत्यागमविरोधः। क्व
चित्सकलोऽप्येष कविकौशलस्य दोषगणानामुत्कर्षगुणावीथिं विगाहते। तत्कविकौशलमुदाहरति॥ ॥राज
न्तस्य प्रभावेन तदुद्यानानि जज्ञिरे। जाता निष्पार्द्रांशुकान्येव प्रवालानि किसलमानिमिषां तेष्वाद्रांशुकप्र
वालाः। तेषां सुरस्त्रीयिनीनंदनोद्यानवृत्तानां नमेरुसंतानकपारिजातादीनामास्पदमिति देशविरोधो

पत्तोनस्वर्गद्रुमाममनुष्यभूमौभवंतिमपषदेशविरोधगुणगणनाकविकौशलाद्धिगाहते।तस्यप्रभावे
दं०टि० णोति।कविकौशलंतस्यराज्ञोहरेरुद्यानक्रीडामाममरैरानीयस्वर्गद्रुमाःपरिजोषायस्थाप्यंतेयत्तोनदे
॥३९॥ शविरोधः।यद्विपुनस्तस्यराज्ञःप्रभावेणोतिकविकौशलंनस्यात्।तदाभवत्येषदेशविरोधइति।एतांवि
39 नाशपिशुनस्यचाररस्वरमाहूतः।धुनुत्कदंबरजसासहसप्रवृद्धदोहमानः।इतिकालविरोधः।यतःकदंबर
जसासहसप्रवृद्धःपुष्पाणांमदसंभवोवर्षासुकदंबरजोनशरदीति।तदेतत्कविकौशलात्प्रदुःष्यतीति
।एतत्कविकौशलंराजाविनाशपिशुनःचंडउसातवातःसत्वयात्राप्रस्थानेतत्रिमयमरणसूचकः।तस्यवा
कालिकःतस्यसंभावलद्धतमसंभवत्येवेतिनदोषः॥ ॥दोलातिप्रेरणात्रस्तवधूजनमुखोद्भवम्॥कामि
नांलयवैषम्याद्धीनंरागमवर्द्धयत्॥लयवैषम्यंचेतनीतस्यरागहेतुत्वमविलमंगीतंरागहेतुविषमल
यंवैरस्यायेतिकलाविरोधः।दोलातिप्रेरणात्रस्तवधूजनमुखोद्भतमितिकविकौशलात्।कालविरोधः राम०
कामिनांस्खलितमप्युपकारि॥ ॥हंवोदेर्विषच्छामीश्रिशिरेहव्यवाहनं॥अवलाविरहक्लेशविद्ध ॥३९॥

योगराय सलं। इति लोकविरोधः। यतो न खलु चांद्रमनसा ह्यान्तः शीतलः शिषं तिलोकविदितमिदं कामी
तिवितथाभ्यवला विरहक्लेशाविद इति च यत। कविकौशलं। ततो न लोकविरोधदोषः। तदुक्तं। दुःखितमन
सि सर्वमसह्यं। हव्यवाहनादपि चांद्राद्दपि। विरहिणामसह्याः मन्मथपीडितानां रम्येषु हेयादिति॥ ॥प्र
मेयोप्यप्रमेयोसि सकलोप्यसि निष्कलः॥ एकश्चलमनेकोसि नमस्ते विश्वमूर्त्तये॥ इति न्यायविरोधः। न प्र
मेयाप्रमेययोः सकलनिष्कलयोः एकानेकयोः परस्परविरुद्धयोर्धर्म्मयोर्युगपदेकत्र धर्मिणि समावेश उप
पत्तिमानिति सत्यं एषः विश्वमूर्त्तये नमः। इति विश्वमूर्त्तिवचनात्कविकौशलान्न दुष्यति। यतो विश्वमूर्त्तिरसा
वतो न न्यायविरोधः॥ ॥पंचानां पांडुपुत्राणां पत्नी पंचालकन्यका॥ सतीनामग्रणीश्चासीद्दैवो हि विधि
रीदृशः॥ पंचानां पांडुपुत्राणां युधिष्ठिरादीनां द्रौपदी पत्नी। तथापि पतिव्रता इत्यागमविरोधो प्येवं दैवो हि
विधिरीदृश इति कविकौशलान्न दुष्यति। निपातितरीदृक गुर्वाचाद इति दैवो हि विधि प्रयुक्तं। तथा आज्ञा गुरूणा
मविलंघनीया इति एवमस्तूपते पुरा किलार्जुनेन राधावेधात रोपणीतां द्रौपदी पंचस्वामे दर्शिता। हिन्त्रं व

द्रूपंलब्धेति। ततः किलकुंत्याभिहितमेषाभित्वापंचभिपुष्यामीतिखुसन्नबुद्धिरित्यादिनाप्रकृतमुपसंहर
र०टी० ति। खुसन्नबुद्धिः॥ ॥इतिरंअलंकारटीकासमाप्ता॥ शुभम् ॥ संवत् १८६१ आषाढ
कृष्ण त्रितीयायां सोमवासरे समाप्तं शुभमस्तु॥ ॥ ॥ ॥छ॥ ॥ ॥
॥४०॥ ग्रंथ संख्या २३२५

१०००